সাংখ্যদীপনী।

রাজকীয়সংস্কৃতবিদ্যালয়াধ্যাপক-

মহামহোপাধ্যায়-

শ্রীকামাখ্যানাথতর্কবাগীশেন বিরচিতা।

শ্রীমদীশ্বরকৃষ্ণপ্রণীতসাংখ্যকারিকয়া সহিতা।

সংস্কৃতবিদ্যালয়ীয়মধ্যোপাধিশ্রেণীস্থছাত্রেণ

শ্রীযুক্ত আশুতোষভট্টাচার্য্যেণ সংশোধিতা

প্রকাশিতা চ।

কলিকাতা রাজধান্যাম্।

১০ সংখ্যক শ্রীশম্ভুচন্দ্রচাটুর্য্যেষ্ট্রীটস্থ নিউ আর্য্যমিশন্ যন্ত্রে

শ্রীযুক্ত ইউ. রক্ষিত দ্বারা মুদ্রিত।

শকাব্দাঃ ১৮২২।

মূল্য ১৲ টাকা মাত্র।

সাংখ্যদীপনী।

রাজকীয়সংস্কৃতবিদ্যালয়াধ্যাপক-

মহামহোপাধ্যায়-

শ্রীকামাখ্যানাথতর্কবাগীশেন বিরচিতা।

শ্রীমদীশ্বরকৃষ্ণপ্রণীতসাংখ্যকারিকয়া সহিতা।

সংস্কৃতবিদ্যালয়ীয়ন্যায়োপাধিশ্রেণীস্থচ্ছাত্রেণ

শ্রীযুক্ত আশুতোষভট্টাচার্য্যেণ সংশোধিতা

প্রকাশিতা চ।

কলিকাতা রাজধান্যাম্।

১০ সংখ্যক শ্রীশম্ভুচন্দ্রচাটুর্য্যোবষ্ট্রীটস্থ নিউ আর্য্যমিসন্ যন্ত্রে

শ্রীযুক্ত ইউ রক্ষিত দ্বারা মুদ্রিত।

শকাব্দাঃ ১৮২২।

সাংখ্যদীপনী

দুঃখত্রয়াভিঘাতাৎ জিজ্ঞাসা তদপঘাতকে হেতৌ
দৃষ্টে সাপার্থা চেন্নৈকান্তাত্যন্তোঽভাবাৎ ॥১॥

রামব্রহ্মপদাম্ভোজমভিবন্দ্য সমাদরাৎ।
কামাখ্যানাথবিপ্রেণ ক্রিয়তে সাংখ্যদীপনী ॥২॥

ইহ খলু নিসর্গপ্রতিকূলস্বভাবং সর্ব্বজনসংবেদনসিদ্ধদুঃখং জিহাসূনাং তদ্ধানোপায়মবিদুষাং প্রেক্ষাবতাং দুঃখহানোপায়ভূতে শাস্ত্রে ইষ্টসাধনতাজ্ঞানাৎ অবশ্যং জিজ্ঞাসা ভবতীত্যাহ দুঃখত্রয়েত্যাদি, দুঃখত্রয়স্য আধ্যাত্মিকাধিভৌতিকাধিদৈবিকভেদেন ত্রিবিধদুঃখস্য অভিঘাতাৎ অসহ্যসম্বন্ধাৎ, তদপঘাতকে তস্য দুঃখত্রয়স্য অপঘাতকে প্রকৃতিপুরুষবিবেকদ্বারা বিনাশকে, হেতৌ সাংখ্যশাস্ত্রে, জিজ্ঞাসা প্রেক্ষাবতাং জ্ঞানেচ্ছা ভবতি। সাংখ্যশাস্ত্রজ্ঞানেন প্রকৃতিপুরুষয়োঃ ভেদজ্ঞানং ভবতি তদেব তত্ত্বজ্ঞানং তেন মুক্তির্ভবতীতি ভাবঃ। আত্মানং শরীরং অন্তঃকরণঞ্চ অধিকৃত্য যৎ দুঃখং জায়তে তৎ আধ্যাত্মিকং যথা বাতপিত্তাদিপ্রকোপজন্যং দুঃখম্। ভূতানি প্রাণিনঃ অধিকৃত্য যৎ দুঃখং জায়তে তৎ আধিভৌতিকং যথা ব্যাঘ্রচৌরাদিজনিতং দুঃখং, দেবাগ্ন্যাদীন্ অধিকৃত্য যৎ দুঃখং জায়তে তৎ আধিদৈবিকং যথা দাহশীতাদিজনিতং, যক্ষরাক্ষসাদ্যভিনিবেশজন্যঞ্চ দুঃখম্।

সুকরস্য দৃষ্টোপায়স্য অবলম্বনেন তাদৃশদুঃখত্রয়বিনাশসম্ভবে দুষ্করস্য তত্ত্বজ্ঞানরূপোপায়স্যাবলম্বনং বিফলং তথাহি শরীরদুঃখস্য প্রসিদ্ধৌষধাদিসেবনাৎ মানসদুঃখস্য উত্তম.ভোজনাদ্যনুষ্ঠানাৎ আধিভৌতিকস্য নীতিশাস্ত্রাভ্যাসাৎ আধিদৈবিকস্য মণিমন্ত্রাদ্যবলম্বনাৎ বিনাশঃ সম্ভবতি ইত্যাশঙ্কতে দৃষ্টে সেতি দৃষ্টে দৃষ্টোপায়ে, সা জিজ্ঞাসা, অপার্থা অন্যথাসিদ্ধা, চেৎ যদীত্যর্থঃ। নিষেধতি নেতি নৈকান্তাত্যন্ততোঽভাবাৎ, একান্তঃ দুঃখনিবৃত্তেরবশ্যম্ভাবঃ, অত্যন্তঃ নিবৃত্তস্য দুঃখস্য পুনরনুৎপাদঃ, তয়োর্দৃষ্টোপায়াবলম্বনেন অভাবাদিত্যর্থঃ, একান্তাত্যন্তত ইত্যত্র ষষ্ঠীস্থানে তসিঃ একান্তা[illegible] রিত্যর্থঃ। দৃষ্টোপায়াবলম্বনে কদাচিৎ দুঃখনিবৃত্তি[illegible] ন সম্ভবতি সম্ভবে বা ন অত্যন্তদুঃখনিবৃত্তিঃ সম্ভবতি বর্তমানদুঃখনিবৃত্তাবপি ভাবিদুঃখোৎপাদসম্ভব ইতি ভাবঃ ॥১॥

লৌকিকোপায়াবলম্বনেন তাদৃশদুঃখনিবৃত্তেরসম্ভবেঽপি বৈদিকজ্যোতিষ্টোমাদ্যুপায়াবলম্বনাৎ তাদৃশদুঃখত্রয়নিবৃত্তিসম্ভবাৎ তত্ত্বজ্ঞানরূপোপায়াবলম্বনং বিফলম্ ইত্যাশঙ্কামপনেতুমাহ।

দৃষ্টবদানুশ্রবিকঃ স হ্যবিশুদ্ধিক্ষয়াতিশয়যুক্তঃ।
তদ্বিপরীতঃ শ্রেয়ান্ ব্যক্তাব্যক্তজ্ঞবিজ্ঞানাৎ ॥২॥

গুরুমুখাদনুশ্রূয়তে ইতি ব্যুৎপত্ত্যা অনুশ্রবো বেদঃ তৎপ্রতিপাদিতঃ জ্যোতিষ্টোমাদ্যুপায়ঃ আনুশ্রবিকঃ স চ দৃষ্টবৎ লৌকিকপ্রসিদ্ধৌষধাদিতুল্যঃ ইত্যর্থঃ, অত্র হেতুমাহ, স হ্যবিশুদ্ধীতি। হি যতঃ স বৈদিকোপায়ঃ জ্যোতিষ্টোমাদিকর্মকলাপঃ, অবিশুদ্ধিক্ষয়াতিশয়যুক্তঃ, অবিশুদ্ধিঃ অঙ্গবৈগুণ্যং শাস্ত্রনিষিদ্ধপশ্বাদিবধজনিতপাপজনকত্বঞ্চ, ক্ষয়ঃ জ্যোতিষ্টোমাদিজনিতস্বর্গরূপফলস্য

ক্ষয়িত্বেন ক্ষয়ানন্তরং দুঃখসম্ভাবনা, অতিশয়ঃ স্বর্গমাত্রসাধন-জ্যোতিষ্টোমাদিজন্যফলাপেক্ষয়া স্বারাজ্যসাধনবাজপেয়াদিজনিতফলস্য উৎকর্ষজ্ঞানেন দুঃখসম্ভাবনা, পরকীয়ৈশ্বর্য্যং জানন্ অনৈশ্বর্য্যসম্পন্নঃ পুরুষো দুঃখিতো ভবতি ইতি নিয়মাৎ। তৈর্যুক্তঃ। তদ্বিপরীতঃ শ্রেয়ান্, তদ্বিপরীতঃ, লৌকিকবৈদিকোপায়ব্যতিরিক্তোপায়ঃ তত্ত্বজ্ঞানরূপঃ, শ্রেয়ান্ একান্তাত্যন্তদুঃখবিনাশসমর্থ ইত্যর্থঃ। তাদৃশ-তত্ত্বজ্ঞানস্য কথমুৎপাদ ইত্যত আহ, ব্যক্তাব্যক্তজ্ঞবিজ্ঞানাৎ, ব্যক্তঞ্চ অব্যক্তঞ্চ জ্ঞশ্চ তেষাং বিজ্ঞানাৎ বিবেকেন জ্ঞানাদিত্যর্থঃ, আদৌ ব্যক্তং ভূতাদিকার্য্যং তস্য জ্ঞানং, ততঃ কার্য্যজ্ঞানেন কারণস্য [illegible]স্য জ্ঞানং, ততঃ তয়োঃ পুরুষার্থত্বেন পুরুষঃ অবশ্যং জ্ঞেয় ইতি পুরুষজ্ঞানম্, ইত্যেবং জ্ঞানক্রমেণৈতদভিহিতম্। তথাচ তত্ত্বজ্ঞানেন মিথ্যাজ্ঞাননিবৃত্তৌ সত্যাং তৎকার্য্যরাগদ্বেষধর্ম্মাধর্ম্মানু-ৎপাদসম্ভবাৎ ভোগেন প্রারব্ধক্ষয়ানন্তরং পুনর্জন্মাভাবেন দুঃখত্রয়া-ত্যন্তনিবৃত্তিরূপো মোক্ষঃ সম্ভবতীতি ভাবঃ ॥২॥

ব্যক্তাব্যক্তজ্ঞানাং লক্ষণমাহ,—

মূলপ্রকৃতিরবিকৃতির্মহদাদ্যাঃ প্রকৃতি-বিকৃতয়ঃ সপ্ত।
ষোড়শকস্তু বিকারো ন প্রকৃতির্ন বিকৃতিঃ পুরুষঃ॥৩॥

মূলপ্রকৃতিঃ সর্ব্বেষাং জনিকা প্রকৃতিঃ, অবিকৃতিঃ অজন্যা, তথাচ যা অজন্যা সতী সর্ব্বেষাং জনিকা সা প্রকৃতিঃ। দ্বিবিধং ব্যক্তমাহ, মহদাদ্যা ইতি, মহদাদ্যাঃ মহত্তত্ত্ব-অহঙ্কারপঞ্চতন্মাত্রাণি, প্রকৃতিবিকৃতয়ঃ প্রকৃতয়শ্চ তে বিকৃতয়শ্চেতি প্রকৃতিবিকৃতয়ঃ, প্রকৃতয়ঃ জনকানি, বিকৃতয়শ্চ জন্যানি চ, তথাচ মহত্তত্ত্বং অহঙ্কার-জনকং মূলপ্রকৃতিজন্যম্, অহঙ্কারঃ পঞ্চতন্মাত্রজনকঃ মহত্তত্ত্বজন্যশ্চ,

পঞ্চতন্মাত্রং পঞ্চমহাভূতজনকম্ অহঙ্কারজন্যঞ্চ, ষোড়শকঃ একাদশেন্দ্রিয়াণি আকাশাদীনি পঞ্চস্থূলভূতানি চ, বিকারস্তু বিকার এব জন্যান্যেবেতি ফলিতার্থঃ। তথাচ একাদশেন্দ্রিয়াণি আকাশাদীনি পঞ্চমহাভূতানি চ কেবলং পঞ্চতন্মাত্রজন্যানি ন কেষাঞ্চিৎ জনকানীতি ভাবঃ। পুরুষস্তেষাং সর্ব্বেষাং ভোক্তা, ন প্রকৃতিঃ ন জনকঃ, ন বিকৃতিঃ, ন জন্যঃ তথাচ পুরুষঃ সর্ব্বকালস্থায়ী সর্ব্বদা অপরিণামী, একরূপাবস্থাসম্পন্নঃ ইতি যাবৎ, পুরুষো যদি জন্যঃ স্যাত্তদা তস্য সর্ব্বকালস্থায়িত্বব্যাঘাতঃ, যদি জনকঃ স্যাত্তদা পরিণামিত্বেন সর্ব্বদা একরূপাবস্থাপন্নত্বব্যাঘাতঃ অতঃ পুরুষঃ অজনকঃ অজন্যশ্চেতি ভাবঃ ॥৩॥

উক্তানাং পঞ্চবিংশতিতত্ত্বানাং সিদ্ধ্যর্থম্ অবশ্যমপেক্ষণীয়ানি প্রমাণান্যাহ,

দৃষ্টমনুমানমাপ্তবচনঞ্চ সর্ব্বপ্রমাণসিদ্ধত্বাৎ।
ত্রিবিধং প্রমাণমিষ্টং প্রমেয়সিদ্ধিঃ প্রমাণাদ্ধিঃ ॥৪॥

দৃষ্টং প্রত্যক্ষম্, অনুমানম্ অনুমিতিকরণং যথা বহ্ন্যনুমিতৌ ধূমাদিকম্, আপ্তবচনম্ আপ্তস্য অভ্রান্তপুরুষস্য বচনং বাক্যং শব্দপ্রমাণমিতি যাবৎ, সর্ব্বপ্রমাণসিদ্ধত্বাৎ সর্ব্বেষাং প্রমাণানাম্ উপমানার্থাপত্তিসম্ভবৈতিহ্যানাং, সিদ্ধত্বাৎ এতেষু অন্তর্ভাবাৎ এতৎ ত্রিবিধং প্রমাণম্, ইষ্টং ভগবতঃ কপিলস্যাভিপ্রেতম্। নন্থ তত্ত্বরূপপ্রমেয়প্রতিপাদনার্থং প্রবৃত্তমেতৎ শাস্ত্রং কথং প্রমাণং লক্ষয়তি ইত্যত আহ প্রমেয়সিদ্ধিঃ প্রমাণাদ্ধি, হি যতঃ প্রমাণাৎ প্রমেয়সিদ্ধিঃ, তত্ত্বরূপপ্রমেয়প্রতীতিঃ, তথাচ প্রমেয়প্রতিপাদনার্থং প্রমাণস্যাপেক্ষণীয়ত্বাদাদৌ প্রমাণলক্ষণমুক্তমিতি ভাবঃ ॥৪॥

প্রমাণত্রয়ং লক্ষয়তি।

প্রতিবিষয়াধ্যবসায়ো দৃষ্টং ত্রিবিধমনুমানমাখ্যাতং।
তল্লিঙ্গলিঙ্গিপূর্ব্বকমাপ্তশ্রুতিরাপ্তবচনন্তু ॥৫॥

প্রতিবিষয়ঃ নিয়তবিষয়ঃ অধ্যবসীয়তে নিশ্চীয়তে অনেনেতি ব্যুৎপত্ত্যা প্রতিবিষয়াধ্যবসায় ইন্দ্রিয়ং তদেব প্রত্যক্ষপ্রমাণং, চক্ষুরাদীন্দ্রিয়জন্যজ্ঞানস্য রূপাদিবিষয়কত্বনিয়মাৎ নিয়তবিষয়কত্বম্। অনুমানং বিভজতে লক্ষয়তি চ ত্রিবিধেতি, পূর্ব্ববৎ শেষবৎ সামান্যতো-দৃষ্টঞ্চ ইতি ভেদেন অনুমানং ত্রিবিধং, তত্র পূর্ব্ববৎ কারণলিঙ্গেন কার্য্যানুমানং, যথা মেঘাদিনা কারণেন কার্য্যস্য বৃষ্ট্যাদেরনুমানং, শেষবৎ কার্য্যলিঙ্গেন কারণানুমানং, যথা ধূমাদিনা কার্য্যেণ কারণস্য বহ্ন্যাদেরনুমানম্। সামান্যতোদৃষ্টং কারণকার্য্যান্যলিঙ্গকমনুমানং, যথা বায়ুনীতচম্পকভাগে গন্ধেন রূপাদ্যনুমানম্। অনুমানসামান্য-লক্ষণমাহ, তল্লিঙ্গলিঙ্গিপূর্ব্বকং, লিঙ্গং ব্যাপ্যং ধূমাদিকং, লিঙ্গি লিঙ্গমস্যাস্তি ইতি ব্যুৎপত্ত্যা ব্যাপকং সাধ্যমিতি যাবৎ, তৎপূর্ব্বকং ব্যাপ্যব্যাপকভাবজ্ঞানপূর্ব্বকং জ্ঞানং তৎ অনুমানমিত্যর্থঃ। শব্দ-লক্ষণমাহ, আপ্তেত্যাদি, আপ্তঃ প্রকৃতবাক্যার্থযথার্থজ্ঞানবান্ পুরুষঃ, শ্রূয়তে ইতি ব্যুৎপত্ত্যা শ্রুতিঃ বাক্যং, তথাচ প্রকৃতবাক্যার্থযথার্থজ্ঞান-বৎপুরুষোচ্চরিতং বাক্যং আপ্তবচনং শব্দপ্রমাণমিত্যর্থঃ ॥৫॥

প্রমাণলক্ষণনিরূপণানন্তরং প্রমাণত্রয়প্রতিপাদ্যবিষয়ানাহ, সামান্যতস্থিতি,

সামান্যতস্তু দৃষ্টাদতীন্দ্রিয়াণাং প্রতীতিরনুমানাৎ।
তস্মাদপি চাসিদ্ধং পরোক্ষমাপ্তাগমাৎ সিদ্ধম্॥৬॥

সামান্যত ইতি ষষ্ঠীস্থানে তসিঃ, তথাচ সামান্যস্য ইন্দ্রিয়যোগ্যস্য

দৃষ্টাৎ প্রত্যক্ষাৎ প্রতীতিঃ সিদ্ধিঃ, উত্তরবাক্যস্থং প্রতীতিপদম্ অত্রাপ্যনুষঞ্জনীয়ম্। অতীন্দ্রিয়াণাম্ ইন্দ্রিয়াযোগ্যানাং প্রকৃত্যাদীনাম্ অনুমানাৎ, প্রতীতিঃ সিদ্ধিঃ, অনুমানঞ্চ মহত্তত্ত্বং সকারণকং কার্য্যত্বাৎ ঘটবৎ ইত্যাকারকম্। তস্মাদপি অনুমানাদপি, অসিদ্ধং অজ্ঞাতং পরোক্ষং অতীন্দ্রিয়ং যাগাদিনিষ্ঠস্বর্গসাধনত্বাদিকম্, আপ্তাগমাৎ, শব্দপ্রমাণাৎ সিদ্ধং নির্ণীতমিত্যর্থঃ ॥৬॥

নমু প্রকৃত্যাদীনাং কথং ন প্রত্যক্ষম্ ইত্যাশঙ্ক্য প্রতক্ষাভাব হেতূনাহ—

অতিদূরাৎ সামীপ্যাদিন্দ্রিয়ঘাতান্মনোঽনবস্থানাৎ।
সৌক্ষ্ম্যাদ্ব্যবধানাদভিভবাৎ সমানাভিহারাচ্চ ॥৭॥

উত্তরকারিকাস্থং তদনুপলব্ধিরিতি পদম্ অত্রাপ্যনুষঞ্জনীয়ং, তথাচ—অতিদূরাৎ দূরত্বাতিশয়রূপদোষাৎ তদনুপলব্ধিঃ তেষাং প্রকৃত্যাদীনাং ন প্রত্যক্ষং যথা অত্যূর্দ্ধগতঃ পক্ষী ন দৃশ্যতে; এবমগ্রেঽপি। সামীপ্যাৎ সামীপ্যাতিশয়াৎ, যথা নয়নস্থিতমঞ্জনং ন দৃশ্যতে। ইন্দ্রিয়ঘাতাৎ ইন্দ্রিয়াণাং চক্ষুরাদীনাং বিনাশাৎ অন্ধত্ববধিরত্বাদিত ইতি যাবৎ। মনোঽনবস্থানাৎ একস্মিন্ ইন্দ্রিয়ে মনসঃ সংযোগে অপরস্মিন্ ইন্দ্রিয়ে সংযোগাভাবাৎ। সৌক্ষ্ম্যাৎ সূক্ষ্মত্বরূপদোষাৎ, যথা পরমাণ্বাদিকং ন দৃশ্যন্তে। ব্যবধানাৎ কুড্যাদিনা আবরণাৎ যথা রাজমহিষ্যাদিকং ন দৃশ্যতে। সমানাভিহারাৎ সমগুণানাং মিশ্রণাৎ, যথা মাহিষাদিদুগ্ধে পতিতং গব্যদুগ্ধং ন দৃশ্যতে॥৭॥

অষ্টসু প্রত্যক্ষপ্রতিবন্ধকদোষেষু মধ্যে কেন দোষেণ প্রকৃত্যাদীনাংন প্রত্যক্ষম্ ইত্যাহ—

সৌক্ষ্ম্যাৎ তদনুপলব্ধিঃ নাভাবাৎ কার্য্যতস্তদুপলব্ধেঃ।
মহদাদি তচ্চ কার্য্যং প্রকৃতিসরূপং বিরূপঞ্চ ॥৮॥

সৌক্ষ্ম্যাৎ নিরবয়বদ্রব্যত্বেন ইন্দ্রিয়াযোগ্যত্বাৎ, তদনুপলব্ধিঃ তেষাং প্রকৃত্যাদীনাম্ অনুপলব্ধিঃ অপ্রত্যক্ষং, নাভাবাৎ ন প্রকৃত্যাদীনাম্ অসত্ত্বাৎ। কুতঃ ন অসত্ত্বম্ ইত্যত আহ কার্য্যতস্তদুপলব্ধেঃ কার্য্যতঃ কার্য্যেণ লিঙ্গেন, তদুপলব্ধেঃ তেষাং প্রকৃত্যাদীনাম্ অনুমানাৎ, কিং তৎকার্য্যমিত্যত আহ, মহদাদীতি মহত্তত্ত্বাহঙ্কারপঞ্চতন্মাত্রাণি আকাশাদয়শ্চ, তেষাং কার্য্যাণাং মধ্যে মহত্ত্বাদিসপ্তকং প্রকৃতিসরূপং কারণস্বরূপসমানধর্ম্মেণ প্রকৃতিসজাতীয়ং, তেষাং কার্য্যাণাং মধ্যে আকাশাদিকং কারণস্বরূপসমানধর্ম্মাভাবাৎ প্রকৃতিবিরূপঞ্চ, প্রকৃতি-বিজাতীয়ঞ্চ। কার্য্যাণাং বিবেকজ্ঞানায় এতদুক্তম্ ॥ ৮ ॥

নৈয়ায়িকাদিমতসিদ্ধস্য সতোঽসজ্জায়তে ইতি নিয়মস্য নিরাস-পূর্ব্বকং সৎকার্য্যবাদং ব্যবস্থাপয়তি।

অসদকরণাৎ উপাদানগ্রহণাৎ সর্ব্বসম্ভবাভাবাৎ।
শক্তস্য শক্যকরণাৎ কারণভাবাচ্চ সৎ কার্য্যম্ ॥৯॥

সৎকার্য্যং, কার্য্যং সৎ, কারণব্যাপারাৎ প্রাগপি বিদ্যতে ইত্যর্থঃ। অত্র হেতুমাহ, অসদকরণাৎ অসতঃ কারণব্যাপারাৎ পূর্ব্বম্ অবিদ্য-মানস্য অকরণাৎ উৎপাদনাসম্ভবাৎ যথা নীলস্য পীতত্বং কেনাপি শিল্পিনা কর্ত্তুং ন শক্যতে তথা অসতঃ কার্য্যস্য সত্ত্বং কেনাপি কারণেন কর্ত্তুং ন শক্যতে, তথাচ এতন্মতে কারণব্যাপারাৎ পূর্ব্বং তিরোভূতং কার্য্যং কারণেন আবির্ভূয়তে ন তূৎপদ্যতে যথা তিলেষু অভিভূতং তৈলং পীড়নেন প্রাদুর্ভূয়তে তথেতিভাবঃ। হেত্বন্তরমাহ,

উপাদানগ্রহণাৎ উপাদানস্য সমবায়িকারণস্য 'গ্রহণাৎ, তথাচ যৎ
কার্য্যং যস্মিন্ তিরোভূতং তৎকার্য্যার্থিনা তদু' পাদীয়তে, কার্য্যস্য
অসত্ত্বে অসত্ত্বাবিশেষাৎ পটার্থিনাপি ঘটোপাদানমুপাদ... ... ১ত্তি
কার্য্যস্য সত্ত্বমিতি ভাবঃ। হেত্বন্তরমাহ, সর্ব্বসম্ভবাভাবাৎ, মৃদাদিভ্যঃ
ঘটাদিদর্শনাৎ যৎ কার্য্যং যত্র সম্বদ্ধং তদেব তস্মাৎ জায়তে ইতি
নিয়মঃ, যদি অসম্বদ্ধমপি কার্য্যং জায়তে তদা অসম্বদ্ধত্বাবিশেষাৎ
সর্ব্বত্র সর্ব্বং জায়েত ইতি ভাবঃ। হেত্বন্তরমাহ শক্তস্য শক্য. রণাৎ
শক্তস্য তৎকার্য্যনিরূপিতশক্তিমতঃ শক্যকরণাৎ শক্যস্য তৎকার্য্যস্য
করণাৎ উৎপাদকত্বাৎ, শক্তিশ্চ কারণে কার্য্যস্য তিরোভাবাবস্থা,
তথাচ সদসতোরসম্বন্ধাৎ কার্য্যস্যাসত্ত্বে সদসতোঃ শক্তিকার্য্যয়োঃ
নিরূপ্যনিরূপকভাবরূপসম্বন্ধাসম্ভব ইতি ভাবঃ। হেত্বন্তরমাহ,
কারণভাবাচ্চ কার্য্যস্য কারণাত্মকত্বাৎ। কারণস্য সত্ত্বে কার্য্যস্য
অসত্ত্বে সদসতোস্তাদাত্ম্যাসম্ভবাৎ তন্ন সম্ভবতি। তথাচ লোকে
ব্রীহিভ্য এব ব্রীহয়ঃ জায়ন্তে ন যবেভ্য ইত্যাদিদর্শনাৎ যদাত্মকং
কারণং তদাত্মকং কার্য্যমিতি নিয়মোঽবশ্যমঙ্গীকর্ত্তব্যঃ তাদৃশনিয়মশ্চ
কার্য্যকারণয়োস্তাদাত্ম্যং বিনা ন সম্ভবতি ইত্যকামেনাপি কার্য্য-
কারণয়োস্তাদাত্ম্যমবশ্যমঙ্গীকর্ত্তব্যমিতি ভাবঃ ॥৯॥

ব্যক্তাব্যক্তয়োর্বৈরূপ্যং দর্শয়তি।

হেতুমদনিত্যমব্যাপি সক্রিয়মনেকমাশ্রিতং লিঙ্গম্।
সাবয়বং পরতন্ত্রং ব্যক্তং বিপরীতমব্যক্তম্ ॥১০॥

"ব্যক্তং" মহদাদিকার্য্যং, "হেতুমৎ" হেতুরাবির্ভাবকারণং বিদ্যতে
যস্য তৎ হেতুমৎ কদাচিদাবির্ভাবস্বভাবম্, "অনিত্যং" কদাচিত্তিরো-
ভাবস্বভাবম্, "অব্যাপি" অসর্ব্বগং মহদাদেঃ সর্ব্বগত্বে ক্রিয়া ন সম্ভ-

র্ত্তীতি ভাবঃ। "সক্রিয়ং" প্রবেশাদিক্রিয়াযুক্তং মহত্তত্ত্বাদিকম্ এক-শরীরং পরিত্যজ্য শরীরান্তরং প্রবিশতি। "অনেকং" প্রতিপুরুষং বিভিন্নম্, "আশ্রিতং" স্বকারণে আশ্রিতং, যথা মহত্তত্ত্বং প্রধানে,অহঙ্কারো মহত্তত্ত্বে পঞ্চতন্মাত্রাণি অহঙ্কারে, পঞ্চমহাভূতানি পঞ্চতন্মাত্রেষু, লিঙ্গং লিঙ্গয়তি জ্ঞাপয়তীতি ব্যুৎপত্ত্যা অনুমাপকং তথাচ মহদাদি-কার্য্যং কারণস্য অব্যক্তস্য অনুমাপকং, ভোগ্যত্বাৎ ভোক্তুঃ পুরুষস্য চ অনুমাপকমিতি ভাবঃ। "সাবয়বম্" অবয়বঃ মিথঃ সংযোগঃ তেন সহ বর্ত্তমানম্, অতএব পৃথিব্যাদয়ঃ পরস্পরং সংযুজ্যন্তে। "পরতন্ত্রং" সাক্ষাৎ পরম্পরয়া বা প্রকৃত্যধীনস্বরূপ-পরিণামকং তথাচ মহদাদীনাং যৎ স্বরূপং যশ্চ কার্য্যকারণরূপেণ পরিণামঃ তদুভয়মপি প্রকৃত্যধীন-মিতি ভাবঃ। "অব্যক্তং" প্রকৃতিঃ, "বিপরীতং" ব্যক্তগতহেতু-মত্ত্বাদিধর্ম্মরহিতম্, অনবস্থাভয়েন অব্যক্তস্য কারণাভাবাৎ অব্যক্তম্ অহেতুমদিতি ভাবঃ। অব্যক্তস্য অজন্যত্বেন নিত্যত্বং মহত্তত্ত্বাদীনাং ভেদেঽপি প্রকৃতেরভিন্নত্বাৎ সর্ব্বগত্বম্। প্রকৃতেঃ সর্ব্বব্যাপিত্বেন পরিস্পন্দাদিক্রিয়াশূন্যত্বম্। প্রকৃতেঃ সজাতীয়ভেদাভাবাৎ একত্বম্। প্রকৃতেঃ কারণরাহিত্যাৎ অনাশ্রিতত্বম্। প্রকৃতেঃ কার্য্যত্বাভাবাৎ ন কারণানুমাপকত্বরূপং লিঙ্গত্বম্। প্রকৃতেঃ সজাতীয়সংযোগাভাবাৎ অনবয়বত্বম্। প্রকৃতেরনধীনত্বস্বরূপত্বেন অপরতন্ত্রত্বং, গুণবত্ত্বেসতীতি বিশেষণাৎ এতদব্যক্তলক্ষণং পুরুষে নাতিব্যাপ্তমিতি সংক্ষেপঃ ॥১০॥

ব্যক্তাব্যক্তয়োঃ সারূপ্যমাহ,

ত্রিগুণমবিবেকি বিষয়ঃ সামান্যমচেতনং প্রসবধর্ম্মি।
ব্যক্তং তথা প্রধানং তদ্বিপরীতস্তথা চ পুমান্॥১১॥

ব্যক্তং মহত্তত্ত্বাদিকং তথা প্রধানং প্রকৃতিঃ, ত্রিগুণং ত্রয়োগুণাঃ

সুখদুঃখমোহা যস্য তৎ ত্রিগুণং, প্রকৃতেঃ সত্ত্বরজস্তমোগুণসাম্যাবস্থারূপত্বেন মহদাদেঃ প্রকৃতিকার্য্যত্বেন সুখদুঃখমোহাত্মকত্রিগুণকার্য্যবত্ত্বম্। অবিবেকি প্রকৃত্যভিন্নং, তথাচ কার্য্যকারণয়োরভেদাৎ মহদাদেঃ প্রকৃত্যভিন্নত্বং, প্রকৃতেস্তু স্বতএবেতি ভাবঃ। বিষয়ঃ জ্ঞেয়ঃ, ন তু জ্ঞানাকারঃ, তথা সতি একপুরুষজ্ঞানস্য পুরুষান্তরাবেদ্যত্বাৎ একস্মিন্ বস্তুনি বহূনাং প্রতিসন্ধানং ন স্যাদিতি। সামান্যং সাধারণং, ভোগ্যত্বেন সকলপুরুষৈর্গ্রাহ্যম্। অচেতনম্ অপ্রকাশকত্বাৎ চেতনভিন্নম্। প্রসবধর্ম্মি প্রসবঃ আবির্ভাবকত্বং স এব ধর্ম্মো যস্য তাদৃশম্। ব্যক্তাব্যক্তাভ্যাং পুরুষস্য সারূপ্যং বৈরূপ্যঞ্চাহ, তদ্বিপরীতস্তথা চ পুমান্, পুরুষঃ তদ্বিপরীতঃ, ত্রিগুণত্বাদিধর্ম্মাভাবাৎ তাভ্যাং ব্যক্তাব্যক্তাভ্যাং বিপরীতঃ বিরূপঃ। তথাচ ব্যক্তাব্যক্তসরূপশ্চ, তথাচ অহেতুমত্ত্বাদিনা অব্যক্তসরূপঃ, অনেকত্বাদিনা ব্যক্তসরূপ ইতি ভাবঃ॥ ১১ ॥

ত্রিগুণানাং সত্ত্বরজস্তমসাং লক্ষণং প্রয়োজনং ক্রিয়াঞ্চাহ,

প্রীত্যপ্রীতিবিষাদাত্মকাঃ প্রকাশপ্রবৃত্তিনিয়মার্থাঃ।
অন্যোঽন্যাভিভবাশ্রয়জননমিথুনবৃত্তয়শ্চ গুণাঃ॥১২॥

প্রীতিঃ সুখং, তচ্চ সত্ত্বগুণকার্য্যং, অপ্রীতিঃ দুঃখং, তচ্চ রজোগুণকার্য্যং, বিষাদঃ মোহঃ, স চ তমোগুণকার্য্যং, কার্য্যকারণয়োরভেদাৎ তদাত্মকত্বং ত্রিগুণলক্ষণম্। প্রয়োজনমাহ—প্রকাশপ্রবৃত্তিনিয়মার্থাঃ, প্রকাশঃ অবভাসঃ, প্রবৃত্তিঃ চালনং, নিয়মঃ প্রতিবন্ধঃ এতে অর্থাঃ প্রয়োজনং যেষাং তে তথা। তথাহি সত্ত্বং রজসা চালিতং সৎকার্য্যং জনয়তি যদি তমোগুণঃ প্রতিবন্ধকতাং নাচরতি, সত্ত্বং তমসা অভিভূতং সৎ ন কিঞ্চিদপি কার্য্যং করোতীতি ভাবঃ। ক্রিয়ামাহ,

অন্যোহন্যেত্যাদি, অন্যোন্যপদং বৃত্তিপদঞ্চ অভিভবাদিচতুর্ষু সম্বদ্ধং তথাহি গুণা অন্যোন্যাভিভববৃত্তয়ঃ অন্যোন্যাশ্রয়বৃত্তয়ঃ, অন্যোন্য-জননবৃত্তয়ঃ, অন্যোন্যমিথুনবৃত্তয়শ্চ, বৃত্তিপদেনাত্র ক্রিয়া উচ্যতে, সা চ শান্তা-ঘোরা-মূঢ়াভেদেন ত্রিবিধা তত্র সাত্ত্বিকী ক্রিয়া শান্তা, রাজসী-ক্রিয়া ঘোরা, তামসীক্রিয়া মূঢ়া। সত্ত্বং রজস্তমসী অভিভূয় শান্তাং রজঃ সত্ত্বতমসী অভিভূয় ঘোরাং তমঃ সত্ত্বরজসী অভিভূয় মূঢ়াং বৃত্তিং লভতে ইত্যন্যোন্যাভিভববৃত্তয়ঃ। ত্রিগুণানাং মধ্যে একো গুণঃ অন্যৌ আশ্রিত্য সহকারিণৌ কৃত্বা প্রবর্ত্ততে ইত্যন্যোন্যাশ্রয়বৃত্তয়ঃ। কার্য্যস্য ত্রিগুণাত্মকত্বাৎ অন্যোন্যজনকা ইত্যন্যোন্যজননবৃত্তয়ঃ। স্ত্রীপুরুষবৎ অন্যোন্যসংযোগশীলা ইত্যন্যোন্যমিথুনবৃত্তয়ঃ ইতি ॥১২॥

সত্ত্বরজস্তমসাং প্রত্যেকলক্ষণমাহ,

সত্ত্বং লঘুপ্রকাশকমিষ্টমুপষ্টম্ভকং চলঞ্চ রজঃ।
গুরু বরণকমেব তমঃ প্রদীপবচ্চার্থতো বৃত্তিঃ ॥১৩॥

অত্র এবকারঃ ভিন্নক্রমঃ প্রত্যেকসম্বদ্ধঃ, সত্ত্বমেব লঘু লঘুত্ববৎ প্রকাশকং বস্তুবভাসকং সত্ত্বাধিক্যেন অঙ্গানাং লঘুতয়া ইন্দ্রিয়াণাং বিষয়গ্রহণসামর্থ্যং তথাচ লঘুত্বং প্রকাশকত্বঞ্চ সত্ত্বগুণলক্ষণম্। ইষ্টং স্বীকৃতং সাংখ্যাচার্য্যৈরিতি শেষঃ। রজ এব উপষ্টম্ভকং প্রেরকং, চলঞ্চ সক্রিয়ঞ্চ, সক্রিয়স্য রজসঃ নিষ্ক্রিয়য়োঃ সত্ত্বতমসোঃ প্রেরকত্বং, তথাচ উপষ্টম্ভকত্বং চলত্বঞ্চ রজসো লক্ষণম্। তম এব গুরু গুরুত্ব-গুণবৎ, আবরণকং আবরকং, তমসএব অঙ্গগুরুত্বাৎ বিষয়াবভাসঃ প্রতিবন্ধকত্বং। তথাচ গুরুত্বম্ আবরকত্বঞ্চ তমসো লক্ষণম্। ননু পরস্পরবিরুদ্ধানাং ত্রিগুণানাং কথমেকস্মিন্নর্থে প্রবৃত্তিরিত্যত আহ, প্রদীপবচ্চার্থতো বৃত্তিরিতি, প্রদীপবৎ তেষাম্ অর্থতঃ একস্মিন্নর্থে

স্থিতিঃ প্রবৃত্তিঃ, তথাচ পরস্পরবিরুদ্ধানাং তৈলবর্ত্তিদীপানাং যথা একপ্রকাশজনকত্বং তদ্বৎ। তৈলপতনেন বর্ত্তেঃ স্বল্পত্বেন চ দীপ-বিনাশাৎ তৈলবর্ত্ত্যোর্দীপবিরোধিত্বম্॥ ১৩॥

মহদাদিষু প্রকৃতিসাধর্ম্ম্যম্ অবিবেকিত্বাদিকমুক্তং তৎ কথমিত্যত-আহ।

অবিবেক্যাদেঃ সিদ্ধিস্ত্রৈগুণ্যাৎ তদ্বিপর্য্যয়েঽভাবাৎ।
কারণগুণাত্মকত্বাৎ কার্য্যস্যাব্যক্তমপি সিদ্ধম্॥১৪॥

অবিবেক্যাদেরিত্যত্র ভাবপ্রধাননির্দ্দেশঃ, অবিবেকিত্বাদেরিত্যর্থঃ, মহদাদিষু অবিবেকিত্বাদেঃ প্রকৃতিধর্ম্মস্য সিদ্ধিঃ অনুমানং, ত্রৈগুণ্যাৎ ত্রিগুণাত্মকত্বাৎ, তথাচানুমানং মহদাদিকম্ অবিবেকিত্বাদিরূপপ্রকৃতি-ধর্ম্মবৎ ত্রিগুণাত্মকত্বাৎ প্রকৃতিবৎ ইতি। অন্বয়েনানুমানমুক্ত্বা ব্যতি-রেকেণ তদাহ তদ্বিপর্য্যয়েঽভাবাৎ, তস্য অবিবেকিত্বস্য বিপর্য্যয়ঃ অভাবো যত্র স তদ্বিপর্য্যয়ঃ পুরুষঃ তত্র অভাবাৎ, ত্রিগুণাত্মকত্বা-ভাবাৎ তথা চানুমানং যত্র অবিবেকিত্বাভাবঃ তত্র ত্রিগুণাত্মকত্বা-ভাবঃ পুরুষবদিতি। ননু প্রকৃতিবদিতি দৃষ্টান্তমুক্তং তস্যাঃ কথং সিদ্ধিরিত্যত আহ কারণগুণাত্মকত্বাদিতি, কার্য্যস্য মহদাদেঃ, কারণগুণাত্মকত্বাৎ অব্যক্তমপি প্রধানমপি সিদ্ধম্ অবাধিতম্। তথাচ যথা পটাদিকার্য্যং তন্তুরূপকারণগুণসজাতীয়গুণকং তথা মহদাদি-কার্য্যমপি কারণগুণসজাতীয়গুণকং তচ্চ কারণং প্রকৃতিঃ, অন-বস্থাভয়েন তস্যা নিত্যত্বমিতি॥ ১৪॥

ননু যথা কণাদগোতমাদীনাং মতে ব্যক্তেভ্যঃ পরমাণুভ্যঃ দ্ব্যণু-কাদিক্রমেণ ব্যক্তং পৃথিব্যাদিকার্য্যম্ উৎপদ্যতে তথা ব্যক্তাদেব ব্যক্তস্যোৎপত্তিসম্ভবে কৃতমব্যক্তেনেত্যত আহ।

ভেদানাং পরিমাণাৎ সমন্বয়াৎ শক্তিতঃ প্রবৃত্তেশ্চ।
কারণকার্য্যবিভাগাৎ অবিভাগাৎ বৈশ্বরূপ্যস্য ॥ ১৫ ॥

অত্র সর্ব্বেষাং পঞ্চম্যন্তভাগানাম্ উত্তরকারিকাস্থেন কারণমস্ত্য-ব্যক্তমিত্যনেন সম্বন্ধঃ। ভিদ্যন্তে ইতি ভেদাঃ মহদাদয়ঃ তেষাং পরি-মাণাৎ পরিমিতত্বাদিতি যাবৎ, তথাচ মহদাদিকার্য্যাণি অব্যক্তকারণ-বন্তি পরিমিতত্বাৎ ঘটাদিবৎ ইত্যনুমানেন মহদাদীনাম্ অব্যক্তকারণ-সিদ্ধিঃ যথা ঘটাদিকার্য্যং পরিমিতত্বাৎ মৃদাদ্যব্যক্তকারণকং তথা মহদাদিকমপি কার্য্যং পরিমিতত্বাৎ প্রকৃতিরূপাব্যক্তকারণকম্ ইতি ভাবঃ। হেত্বন্তরমাহ, সমন্বয়াদিতি সমন্বয়াৎ সুখদুঃখমোহান্বিতত্ব-রূপসমানধর্ম্মবত্ত্বাৎ ইত্যর্থঃ। তথাচ পরস্পরভিন্নানাং মহদাদীনাং সমানরূপত্বং সুখদুঃখমোহাত্মকৈককারণজন্যত্বং বিনা ন সম্ভবতীতি এককারণজন্যত্বং তেষামাবশ্যকম্। তচ্চ কারণং যোগ্যতয়া প্রধান-মেব ইতি ভাবঃ। অপরং হেতুমাহ শক্তিতঃ প্রবৃত্তেশ্চ শক্তিতঃ কারণশক্তিতঃ প্রবৃত্তেঃ কার্য্যোৎপত্তেঃ। শক্তিশ্চ সৎকার্য্যবাদি-মতে কারণে কার্য্যস্যাব্যক্তভাবেনাবস্থানং, ন হ্যন্যা, অয়মেব হি বালু-কাভ্যঃ তিলানাং তৈলোপাদানানাং ভেদঃ যদেতেষ্বেব তৈলম্ অব্যক্তাবস্থং সৎ বর্ত্ততে ন তু বালুকাসু। তথাচ কারণস্য ব্যক্তত্বে তত্র কার্য্যস্যাব্যক্তভাবেনাবস্থানং ন সম্ভবতি ইত্যতঃ কারণস্য অব্য-ক্তত্বং সিদ্ধমিতি ভাবঃ। হেত্বন্তরমাহ, কারণকার্য্যবিভাগাৎ কারণে বিদ্যমানস্য কার্য্যস্য বিভাগাৎ, ইদং কারণম্ ইদং কার্য্যমিতি পৃথক্-প্রত্যয়গোচরত্বাৎ। তথাচ যথা কূর্ম্মশরীরে বিদ্যমানান্যেবাঙ্গানি আবির্ভবন্তি ইদং কূর্ম্মশরীরম্ এতান্যস্য অঙ্গানি ইতি বিভাজ্যন্তে, যথা চ সুবর্ণে বিদ্যমানান্যেব কুণ্ডলানি আবির্ভবন্তি ইদং সুবর্ণম্

এতানি কুণ্ডলানি ইতি বিভাজ্যন্তে তথা মহদাদীনি কার্য্যাণি অব্যক্ত-কারণে প্রকৃতৌ বিদ্যমানান্যেব আবির্ভবন্তি বিভাজ্যন্তে চেতি প্রধান-সিদ্ধিরিতি ভাবঃ। অয়ং ভাবঃ যথা ঘটমুকুটাদযঃ মৃৎপিণ্ডে সুবর্ণ-পিণ্ডে চ বিশন্তঃ মৃৎপিণ্ডং সুবর্ণপিণ্ডঞ্চ অব্যক্তয়ন্তি, তথা পৃথিব্যা-দয়স্তন্মাত্রাণি বিশন্তঃ তন্মাত্রাণ্যব্যক্তয়ন্তি, তন্মাত্রাণ্যহঙ্কারং বিশন্তি অহঙ্কারমব্যক্তয়ন্তি, অহঙ্কারো মহান্তমাবিশন্ মহান্তমব্যক্তয়তি, মহান্ প্রকৃতিং বিশন্ প্রকৃতিমব্যক্তয়তি, প্রকৃতেস্ত ন ক্বচিন্নিবেশ ইতি সা সর্ব্বকার্য্যাণাম্ অব্যক্তমেব। হেত্বন্তরমাহ, অবিভাগাৎ বৈশ্বরূপ্যস্য বৈশ্বরূপ্যস্য ইতি স্বার্থে ষ্যঞ্ঃ প্রত্যযঃ, তথাচ বিশ্বরূপস্য ত্রিলোকস্য অবিভাগাৎ কারণেন একীভাবরূপপ্রলয়াৎ, তথাচ একং প্রকৃতিরূপং কারণং বিনা সর্ব্বস্য জগতঃ একস্মিন্ কারণে একরূপাবস্থানরূপ-প্রলযো ন সম্ভবতীতি ভাবঃ॥ ১৫ ॥

নহু একস্মাৎ তন্তুতঃ পটাদর্শনাৎ কথমেকস্মাৎ প্রধানরূপকার-ণাৎ নানাবিধকার্য্যস্য সম্ভব ইত্যত আহ।

কারণমস্ত্যব্যক্তং প্রবর্ত্ততে ত্রিগুণতঃ সমুদয়াচ্চ।
পরিণামতঃ সলিলবৎ প্রতিপ্রতিগুণাশ্রয়বিশেষাৎ॥ ১৬॥

অব্যক্তং যৎ জগতঃ কারণমস্তি তৎ ত্রিগুণতঃ সত্ত্বাদিগুণত্রয়াৎ প্রবর্ত্ততে কার্য্যমুৎপাদয়তি, তথাচ গুণত্রয়াত্মকপ্রধানস্য একত্বেঽপি গুণানাং বহুত্বাৎ বিবিধকার্য্যসম্ভব ইতি ভাবঃ। নহু গুণানাং ভেদাৎ কথং তেভ্য একজাতীযমহদাদিকার্য্যসম্ভবঃ ইত্যত আহ, সমুদয়া-চ্চেতি সমেত্য উদয়ঃ সমুদয়ঃ মেলনমিতি যাবৎ তথাচ যথা নানা-রূপবিশিষ্টাবয়বৈঃ একস্য চিত্ররূপবিশিষ্টস্যাবয়বিনঃ সম্ভবঃ তথা গুণ-ত্রয়ং গৌণমুখ্যভাবেন মিলিত্বা একজাতীয়ং কার্য্যমুৎপাদয়তি ইতি

ভাবঃ। নন্বেকরূপাণাং গুণানাং কথমনেকরূপা প্রবৃত্তিরিত্যত-আহ প্রতিপ্রতিগুণাশ্রয়বিশেষাৎ, একৈকগুণাশ্রয়বিশেষাৎ, অত্র দৃষ্টান্তমাহ, পরিণামতঃ সলিলবদিতি তথাচ যথা মেঘমুক্তং তোয়ং একরূপবিশিষ্টমপি নারিকেলজম্বীরাদ্যাশ্রয়বিকারানাসাদ্য মধুরতিক্তাদিভাবং প্রতিপদ্যতে তথা একরূপাণামপি গুণানাম্ আশ্রয়রূপ-সহকারিভেদাদেব বিজাতীয়কার্য্যজনকত্বমিতি ভাবঃ ॥ ১৬ ॥

পুরুষে প্রমাণমাহ,—

সংঘাতপরার্থত্বাৎ ত্রিগুণাদিবিপর্য্যয়াদধিষ্ঠানাৎ

পুরুষোঽস্তি ভোক্তৃভাবাৎ কৈবল্যার্থং প্রবৃত্তেশ্চ ॥১৭॥

পঞ্চানাং পঞ্চম্যন্তভাগানাং পুরুষোঽস্তীত্যনেন সম্বন্ধঃ। পুরুষঃ অব্যক্তাদের্ব্যতিরিক্তোঽস্তি, কস্মাৎ সংঘাতপরার্থত্বাৎ, সংঘাতঃ প্রকৃত্যাদিপৃথিব্যন্তসমূহঃ, তস্য পরার্থত্বাৎ পরপ্রয়োজনার্থত্বাৎ তথাচ সুখদুঃখান্যতরসাক্ষাৎকাররূপপ্রয়োজনস্য জড়ে বাধাৎ চৈতন্যাশ্রয়ঃ পুরুষঃ সিদ্ধ ইতি ভাবঃ। হেত্বন্তরমাহ, ত্রিগুণাদিবিপর্য্যয়াৎ, ত্রয়োগুণা আদির্যস্য স ত্রিগুণাদিঃ তস্য বুদ্ধ্যাদিপ্রপঞ্চস্য বিপর্য্যয়াৎ ব্যতিরেকিত্বাৎ তথাচ যথা ঘটাদিকং কিঞ্চিন্নিষ্ঠাভাবপ্রতিযোগি তথা সর্ব্বস্য বুদ্ধ্যাদিপ্রপঞ্চস্য কিঞ্চিদধিকরণনিষ্ঠাভাবপ্রতিযোগিত্বং তচ্চাধিকরণং পুরুষ এব নান্য ইতি পুরুষসিদ্ধিঃ। হেত্বন্তরমাহ, অধিষ্ঠানাৎ জড়াত্মকবুদ্ধ্যাদিপ্রপঞ্চাধিষ্ঠাতৃত্বাৎ, তথাচ সচেতনাধিষ্ঠিতস্যৈবাচেতনস্য কার্য্যজনকত্বাৎ যথা সারথিনাধিষ্ঠিতস্য রথস্যাচেতনস্য গতিমত্ত্বং তথা সচেতনপুরুষাধিষ্ঠিতস্যৈব জড়প্রপঞ্চস্য কার্য্যজনকত্বমিতি ভাবঃ। অপরহেতুমাহ, ভোক্তৃত্বাৎ তথাচ সুখদুঃখাত্মকস্য প্রপঞ্চস্য ভোগ্য-

ত্বেন ন ভোক্তৃত্ব, ভক্তৃভোগ্যয়োঃ ভেদাদিতি ভোক্তৃত্বেন পুরুষ-সিদ্ধিরিতি ভাবঃ। হেত্বন্তরমাহ, কৈবল্যার্থং প্রবৃত্তেশ্চেতি কৈবল্যার্থং মুক্ত্যর্থং প্রবৃত্তেঃ, প্রকৃতিপুরুষবিবেকজ্ঞানাদৌ মুমুক্ষূণাং প্রবৃত্তেঃ তথাচ তাদৃশমুমুক্ষুত্বং প্রকৃত্যাদিষু মধ্যে কস্যাপি ন সম্ভবতি সুখদুঃখমোহাত্মকত্বাৎ, ন হি কশ্চিৎ জাত্বপি স্বভাবং পরিত্যজতি অতঃ মুমুক্ষুত্বেন পুরুষসিদ্ধিরিতি ভাবঃ॥ ১৭॥

পুরুষবহুত্বং সাধয়তি,

জন্মমরণকরণানাং প্রতিনিয়মাৎ অযুগপৎ প্রবৃত্তেশ্চ।
পুরুষবহুত্বং সিদ্ধং ত্রৈগুণ্যবিপর্য্যয়াচ্চৈব॥ ১৮॥

অত্র বিপর্য্যয়াচ্চৈবেত্যেবকারঃ ভিন্নক্রমঃ, তথাচ পুরুষবহুত্বং সিদ্ধমেব, অত্র হেতুমাহ, জন্মমরণকরণানাং প্রতিনিয়মাৎ জন্ম আত্মনো দেহেন্দ্রিয়সম্বন্ধঃ, মরণং, তৎপরিত্যাগঃ, করণানি চক্ষুরাদীন্দ্রিয়াণি এষাং প্রতিনিয়মাৎ ব্যবস্থাতঃ সা চ সর্ব্বশরীরেষু একস্মিন্ পুরুষে নোপপদ্যতে তথা সতি একস্মিন্ জাতে মৃতে বা সর্ব্ব এব জাতা মৃতা বা স্যুঃ এবং একস্মিন্ সচক্ষুষি সর্ব্বে সচক্ষুষঃ স্যুরিতি ভাবঃ। হেত্বন্তরমাহ—অযুগপৎ প্রবৃত্তেঃ একদা একরূপ-প্রবৃত্ত্যদর্শনাৎ তথাচ একস্য ধর্ম্মে অন্যস্য বৈরাগ্যে অন্যস্য অধর্ম্মে অপরস্য ঐশ্বর্য্যে ইত্যেবং প্রবৃত্তিভেদদর্শনাৎ পুরুষবহুত্বমিতিভাবঃ। অপরহেতুমাহ, ত্রৈগুণ্যবিপর্য্যয়াচ্চ, ত্রয়োগুণাঃ ত্রৈগুণ্যং তস্য বিপর্য্যয়ঃ, কচিৎ সুখমেব কচিৎ দুঃখমেব কচিৎ মোহএব ইত্যেবং পরিণামভেদাদিত্যর্থঃ। অন্যথা একস্মিন্ সুখিনি দুঃখিনি বা সর্ব্বে সুখিনো দুঃখিনো বা স্যুরিতিভাবঃ॥ ১৮॥

পুরুষধর্ম্মানাহ,

তস্মাচ্চ বিপর্য্যাসাৎ সিদ্ধং সাক্ষিত্বমস্য পুরুষস্য।
কৈবল্যং মাধ্যস্থ্যং দ্রষ্টৃত্বমকর্তৃভাবশ্চ ॥ ১৯ ॥

তস্মাৎ ত্রিগুণাদেঃ, বিপর্য্যাসাৎ বৈলক্ষণ্যাৎ, বিবেকিত্ব-চেতনত্বা বিষয়ত্বাসাধারণত্বাপ্রসবধর্ম্মিত্বরূপবিরুদ্ধধর্ম্মবত্ত্বাদিতি যাবৎ। অস্য পুরুষস্য দ্রষ্টৃত্বং প্রকৃতির্মম সংসারং কারয়তি ন ত্বহং সংসারবান্ কিন্তু পদ্মপত্রবন্নির্লিপ্ত ইতি জ্ঞানবত্ত্বং, কৈবল্যং আত্যন্তিকং দুঃখশূন্যত্বং, মাধ্যস্থ্যং ঔদাসীন্যং উপকারাপকারশক্তিরহিতত্বমিতি যাবৎ, অকর্তৃভাবশ্চ অকর্তৃত্বঞ্চ ইচ্ছাদ্বেষপ্রযত্নাদিশূন্যত্বমিতি যাবৎ, অতএব সাক্ষিত্বং জ্ঞানৈকস্বরূপত্বং কর্তৃত্বাদিশূন্যস্যৈব কর্তৃত্বাদ্যবভাসকত্বং, তথাচ যথা ঘটাদিধর্ম্মশূন্যস্যৈব দীপাদেঃ ঘটাদ্যবভাসকত্বং তথা কর্তৃত্বাদিধর্ম্মশূন্যস্যৈব পুরুষস্য কর্তৃত্বাদ্যবভাসককত্বমিতি ভাবঃ ॥ ১৯ ॥

নন্বু কর্ত্তুর্বুদ্ধিতত্ত্বস্য চৈতন্যাভাবাৎ চেতনস্য পুরুষস্য কর্তৃত্বাভাবাচ্চ কথং চেতনোঽহং করোমীতি প্রত্যয়স্য প্রামাণ্যমিত্যত আহ,—

তস্মাৎ তৎসংযোগাৎ অচেতনং চেতনাবদিব লিঙ্গম্।
গুণকর্তৃত্বে চ তথা কর্ত্তেব ভবত্যুদাসীনঃ ॥ ২০ ॥

তস্মাৎ প্রাগুক্তযুক্ত্যা কর্তৃত্বচৈতন্যয়োর্বৈয়ধিকরণ্যস্য সিদ্ধত্বাৎ, তৎসংযোগাৎ তয়োঃ প্রকৃতিপুরুষয়োঃ সংযোগাৎ বিম্বপ্রতিবিম্বভাবাৎ লিঙ্গং বুদ্ধিতত্ত্বম্, অচেতনম্ অচেতনমপি, চেতনাবদিব জানামীতি জ্ঞানবদিব ভবতি, গুণকর্তৃত্বে চ গুণাঃ সুখদুঃখমোহরূপাঃ তেষাং কর্তৃত্বে চ কর্তৃত্বেঽপি তথা গুণসংযোগাৎ উদাসীনঃ উদাসীনোঽপি পুরুষঃ কর্ত্তেব ভবতি কৃতিমানিব ভবতি। তথাচ প্রকৃতিঃ

পুরুষয়োঃ ভেদাগ্রহাৎ কর্ত্তৃধর্ম্মকর্ত্তৃত্বাদিমত্বেন পুরুষঃ পুরুষধর্ম্ম-চৈতন্যাদিমত্বেন চ কর্ত্তৃরূপং বুদ্ধিতত্বং প্রতীয়তে প্রতীতিস্তু ভ্রমরূপৈ-বেতি ভাবঃ ॥ ২০ ॥

প্রকৃতিপুরুষসংযোগহেতুমাহ,

পুরুষস্য দর্শনার্থং কৈবল্যার্থং তথা প্রধানস্য।
পঙ্গ্বন্ধবদুভয়োরপি সংযোগঃ তৎকৃতঃ সর্গঃ ॥ ২১ ॥

পুরুষস্য কৈবল্যার্থং তথা প্রধানস্য বুদ্ধিতত্বস্য দর্শনার্থং ভোগা-র্থম্ উভয়োরপি সংযোগঃ সন্নিধানং, ভবতীতি শেষঃ, প্রধানস্যেতি কর্ম্মণি ষষ্ঠী, প্রধানকর্ম্মকভোগার্থমিতি ফলিতার্থঃ। তথাচ ভোক্তার-মন্তরেণ ভোগাসম্ভবাৎ ভোক্তুঃ পুরুষস্য সিদ্ধিঃ এবং প্রধানপুরুষয়োঃ ভেদগ্রহনিবন্ধনো মোক্ষঃ প্রধানং বিনা ন সম্ভবতীতি প্রধানসিদ্ধি-রিতি ভাবঃ। উভয়স্য কার্য্যে উভয়স্যাপেক্ষা ইত্যত্র দৃষ্টান্তমাহ, পঙ্গ্বন্ধবদিতি, যথা পঙ্গ্বন্ধয়োরেকত্র মেলনে পঙ্গুরন্ধস্য মার্গদর্শনায় অন্ধশ্চ পঙ্গোর্নয়নায় সমর্থো ভবতি তদ্বদত্রাপীত্যর্থঃ। মহদাদিলক্ষণ-সর্গার্থমপি তাদৃশসংযোগস্যাপেক্ষা ইত্যাহ তৎকৃতঃ সর্গ ইতি, সর্গঃ মহদাদিলক্ষণঃ সর্গঃ তৎকৃতঃ তেন সংযোগেন জনিত ইত্যর্থঃ। তথাচ মহদাদিসর্গমন্তরেণ সংযোগোঽপি ন ভোগায় মোক্ষায় চ সমর্থ-ইতি সর্গস্যাবশ্যকত্বমিতি ভাবঃ ॥ ২১ ॥

সৃষ্টিক্রমমাহ,—

প্রকৃতের্মহাংস্ততোঽহঙ্কারস্তস্মাদ্গণশ্চ ষোড়শকঃ।
তস্মাদপি ষোড়শকাৎ পঞ্চভ্যঃ পঞ্চভূতানি ॥ ২২ ॥

প্রকৃতেঃ প্রধানাৎ, মহান্ মহত্তত্ত্বং বুদ্ধিতত্ত্বাপরপর্য্যায়ং

জায়তে। ততঃ মহত্তত্ত্বাৎ, অহঙ্কারঃ চেতনোঽহমিতি প্রত্যয়ঃ, জায়তে। তস্মাৎ অহঙ্কারাৎ ষোড়শকোগণঃ, শব্দাদীনি পঞ্চতন্মাত্রাণি একাদশেন্দ্রিয়াণি চ জায়ন্তে। তস্মাদপি ষোড়শকাৎ ইত্যত্র ব্রজ,গর্ত্তাদিত্বাৎ পঞ্চমী, তং ষোড়শগণং প্রাপ্য স্থিতেভ্যোঃ তাদৃশষোড়শগণান্তর্ভূতত্বেন স্থিতেভ্য ইতি যাবৎ, পঞ্চভ্যঃ, পঞ্চতন্মাত্রেভ্যঃ পঞ্চভূতানি আকাশাদীনি পঞ্চমহাভূতানি জায়ন্তে। তথাচ শব্দতন্মাত্রাদাকাশং তস্য শব্দো গুণঃ,শব্দতন্মাত্রসহিতাৎ স্পর্শতন্মাত্রাৎ বায়ুঃ শব্দস্পর্শগুণবান্, শব্দস্পর্শতন্মাত্রসহিতাৎ রূপতন্মাত্রাৎ তেজঃ শব্দস্পর্শরূপগুণবৎ, শব্দস্পর্শরূপতন্মাত্রসহিতাৎ রসতন্মাত্রাৎ জলং শব্দস্পর্শরূপরসগুণকং, শব্দস্পর্শরূপরসতন্মাত্রসহিতাৎ গন্ধতন্মাত্রাৎ পৃথিবী শব্দস্পর্শরূপরসগন্ধগুণেতি ভাবঃ॥ ২২ ॥

বুদ্ধের্লক্ষণমাহ,—

অধ্যবসায়োবুদ্ধির্ধর্ম্মোজ্ঞানং বিরাগ ঐশ্বর্য্যম্।
সাত্ত্বিকমেতদ্রূপং তামসমেতদ্বিপর্য্যস্তম্ ॥ ২৩ ॥

অধ্যবসায়ো ময়েদং কর্ত্তব্যমিত্যাকারকনিশ্চয়ঃ, বুদ্ধিঃ বুদ্ধিপদার্থঃ। দীপশিখা যথা প্রতিক্ষণং পরিণমতি তথা সা বুদ্ধিঃ প্রতিক্ষণং পরিণামিনী ভবতি। বুদ্ধিধর্ম্মানাহ, ধর্ম্মোজ্ঞানমিতি, ধর্ম্মঃ বিহিতয়াগাদ্যনুষ্ঠানজন্যাদৃষ্টবিশেষঃ, জ্ঞানং আত্মতত্ত্বজ্ঞানং, বিরাগঃ বৈরাগ্যং, তচ্চ বিষয়বাসনারাহিত্যরূপং, ঐশ্বর্য্যম্ অণিমাদ্যষ্টবিধং, তদুক্তম্, অণিমা লঘিমা প্রাপ্তিঃ প্রাকাম্যং মহিমা তথা। ঈশিত্বঞ্চ বশিত্বঞ্চ তথা কামাবসায়িতা॥ তত্রাণিমা অণুভাবঃ যতঃ শিলামপি প্রবিশতি, লঘিমা লঘুভাবঃ, যতঃ সূর্য্যমরীচিমালম্ব্য সূর্য্যলোকং যাতি,

প্রাপ্তিঃ অঙ্গুল্যগ্রেণ স্পৃশতি চন্দ্রম্। প্রাকাম্যম্ ইচ্ছানভিঘাতঃ যতো ভূমাবুন্মজ্জতি নিমজ্জতি যথোদকে। বশিত্বং ভূতভৌতিকং বশীভবত্যস্যাবশ্যস্যম্। কামাবসায়িত্বং সত্যসংকল্পতা যথাস্য সংকল্পো ভবতি ভূতেষু তথৈব ভূতানি ভবন্তি। এতেষাং চতুর্ণাং বুদ্ধিধর্ম্মাণাং সাত্ত্বিকত্বম্। এতদ্বিপরীতানাম্ অধর্ম্মাজ্ঞানাবৈরাগ্যানৈশ্বর্য্যাণাং চতুর্ণাং বুদ্ধিধর্ম্মাণাং তামসত্বমিতি॥ ২৩॥

অহঙ্কারলক্ষণমাহ,

অভিমানোঽহঙ্কারস্তস্মাদ্দ্বিবিধঃ প্রবর্ত্ততে সর্গঃ।
ঐন্দ্রিয় একাদশকস্তন্মাত্রপঞ্চকশ্চৈব॥ ২৪॥

অভিমানঃ অহমেবাত্রাধিকৃতঃ মদীয়া এবামী বিষয়াঃ ইতি প্রত্যয়ঃ, অহঙ্কারঃ অহঙ্কারপদার্থঃ। তস্য কার্য্যভেদমাহ, তস্মাদিত্যাদিঃ, তস্মাৎ অহঙ্কারাৎ, দ্বিবিধঃ দ্বিপ্রকারঃ, সর্গঃ প্রপঞ্চঃ, প্রকারদ্বয়মাহ, ঐন্দ্রিয় ইতি, ঐন্দ্রিয়ঃ ইন্দ্রিয়জাতীয়ঃ, একাদশকঃ একাদশসংখ্যকোগণঃ চঃ পুনঃ, তন্মাত্রপঞ্চকঃ; তন্মাত্রজাতীয়ঃ পঞ্চসংখ্যকোগণঃ। এবকারোগণান্তরব্যবচ্ছেদায় ইতি॥ ২৪॥

একাদশেন্দ্রিয়াণাং মধ্যে দশবাহ্যেন্দ্রিয়াণি তান্যাহ

বুদ্ধীন্দ্রিয়াণি চক্ষুঃশ্রোত্রঘ্রাণরসনত্বগাখ্যানি।
বাক্‌পাণিপাদপায়ূপস্থাখ্যকর্ম্মেন্দ্রিয়াণি॥ ২৬॥

শব্দস্পর্শরূপরসগন্ধাঃ বুধ্যন্তে এভিরিতি ব্যুৎপত্ত্যা বুদ্ধিজনকানি বুদ্ধীন্দ্রিয়াণি, তানি চক্ষুরাদীনি। বাগাদীনি কর্ম্মজনকেন্দ্রিয়াণীতি॥ ২৬॥

একাদশেন্দ্রিয়ং মনঃ তংক্ষণমাহ,

উভয়াত্মকমত্র মনঃ সংকল্পকমিন্দ্রিয়ঞ্চ সাধর্ম্ম্যাৎ।
গুণপরিণামবিশেষান্নানাত্বং বাহ্যভেদাশ্চ ॥ ২৭ ॥

মনঃ মনঃসংজ্ঞকমিন্দ্রিয়ং, সংকল্পকং সামান্যাকারেণ গৃহীতং বিষয়ং ইদমেবং এবং ন ইতি সম্যক্ কল্পয়তি বিশেষণ-বিশেষ্যভাবেন বিবেচয়তি যৎ তৎ সংকল্পকং, প্রথমং চক্ষুঃ ঘটাকারেণ বস্তু গৃহ্লাতি, অনন্তরং মন এব ইদং ঘটত্বরূপবিশেষণযুক্তোঘট এব নান্য ইতি বিশেষেণ স্থিরীকরোতি। অতএব মনঃ উভয়াত্মকং চক্ষুরাদিবুদ্ধীন্দ্রিয়াত্মকং, বাগাদিকর্ম্মেন্দ্রিয়াত্মকঞ্চ, সর্ব্বত্রৈব মনসো অধিষ্ঠানাৎ সর্ব্বাণি ইন্দ্রিয়াণি মনঃ সহকৃত্যেব স্বস্বকার্য্যং জনয়ন্তি। ননু মনসঃ ইন্দ্রিয়সহকারিত্বেঽপি কথমিন্দ্রিয়ত্বং যদি ইন্দ্রিয়সহকারিত্বমাত্রেণ ইন্দ্রিয়ত্বং তদা মহদহঙ্কারযোঃ আলোকসংযোগস্য চ ইন্দ্রিয়সহকারিত্বেন ইন্দ্রিয়ত্বং স্যাৎ ইত্যত আহ, ইন্দ্রিয়ঞ্চ সাধর্ম্ম্যাদিতি ইন্দ্রিয়ান্তরেণ সহ সাধর্ম্ম্যাৎ সমানধর্ম্মবত্বাৎ মনসোঽপি ইন্দ্রিয়ত্বং ন তু মহদহঙ্কারয়োঃ আলোকসংযোগস্য চ, সাধর্ম্ম্যাভাবাৎ সাধর্ম্ম্যঞ্চ উদ্রিক্তসত্ত্বগুণকাহঙ্কারোপাদানকত্বং, যথা চক্ষুরাদীনাং উদ্রিক্তসত্ত্বগুণকাহঙ্কারোপাদানকত্বং তথা মনসঃ ন তু মহদাদীনামিতি ভাবঃ। ননু একস্মাৎ উদ্রিক্তসত্ত্বগুণকাহঙ্কারাৎ কথমেকাদশেন্দ্রিয়াণি ইত্যত্রাহ, গুণপরিণামেতি, গুণানাং সত্ত্বাদীনাং যঃ পরিণামঃ শব্দাদ্যুপভোগজনকাদৃষ্টবিশেষরূপঃ পরিণামবিশেষঃ তস্মাৎ নানাত্বং ইন্দ্রিয়াণাং নানাত্বং, তথাচ সহকারিভেদাৎ কার্য্যভেদ ইতি ভাবঃ। বাহ্যভেদাশ্চেতি দৃষ্টান্তার্থমুক্তং, যথা বাহ্যবস্তূনাং কারণভেদাৎ পরস্পরং ভেদঃ, তথা ইন্দ্রিয়াণামিতি নিগূঢ়াভিপ্রায়ঃ ॥ ২৭ ॥

একস্মাৎ অহঙ্কারাৎ কথং সর্গদ্বয়মিত্যাশঙ্কাহ,

সাত্ত্বিক একাদশকঃ প্রবর্ত্ততে বৈকৃতাদহঙ্কারাৎ।
ভূতাদেস্তন্মাত্রঃ স তামসস্তৈজসাদুভয়ম্॥ ২৫॥

একাদশকঃ একাদশেন্দ্রিয়গণঃ, বৈকৃতাৎ বিকৃতোঽহমহঙ্কার-ইতি সাংখ্যাচার্য্যসঙ্কেতবিষয়াৎ অহঙ্কারাৎ সাত্ত্বিকঃ উদ্রিক্তসত্ত্ব-গুণজন্যঃ, উদ্রিক্তসত্ত্বগুণকাহঙ্কারাৎ ইন্দ্রিয়গণোজায়তে ইতি ফলি-তার্থঃ। তন্মাত্রঃ তন্মাত্রগণঃ, ভূতাদেঃ তামসাৎ, অহঙ্কারাৎ, উদ্রিক্ত-তমোগুণকাদহঙ্কারাৎ তন্মাত্রগণোজায়তে ইতি ফলিতার্থঃ তন্মাত্র-গণস্য তমোগুণজন্যত্বে হেতুগর্ত্তবিশেষণমাহ, স তামস ইতি, স তন্মা-ত্রগণঃ, তামসঃ তমোগুণপ্রধানঃ, তথাচ তামসাদুৎপত্তেরেব তন্মাত্রস্য তামসত্বমিতি ভাবঃ। নন্থ যদি সত্ত্বতমোভ্যামেব কার্য্যং তদা রজসঃ কিং প্রয়োজনম্ ইত্যত আহ তৈজসাদিতি, তৈজসাৎ উদ্রিক্তরজো-গুণকাৎ অহঙ্কারাৎ উভয়ম্ উক্তগণদ্বয়ং তথাচ সত্ত্বতমসোঃ স্বতোনি-ষ্ক্রিয়ত্বেন রজসা চালিতয়োরেব কার্য্যোৎপাদনসামর্থ্যমিতি রজস-আবশ্যকত্বমিতি ভাবঃ॥ ২৫॥

পঞ্চানাং জ্ঞানেন্দ্রিয়াণাং কর্ম্মেন্দ্রিয়াণাঞ্চ ব্যাপারমাহ,

রূপাদিষু পঞ্চানামালোচনমাত্রমিষ্যতে বৃত্তিঃ।

বচনাদানবিহরণোৎসর্গানন্দাশ্চ পঞ্চানাম্॥ ২৮॥

পঞ্চানাং জ্ঞানেন্দ্রিয়াণাং চক্ষুরসনাঘ্রাণশ্রোত্রত্বচাং, রূপাদিষু রূপাদিবিষয়কম্, অত্র সপ্তম্যার্থোবিষয়ত্বং, আলোচনং নির্ব্বিকল্পকং, বৃত্তিঃ ব্যাপার ইষ্যতে, তথাচ চক্ষুষঃ রূপবিষয়কং, রসনায়াঃ রস-বিষয়কং, ঘ্রাণস্য গন্ধবিষয়কং, শ্রোত্রস্য শব্দবিষয়কং, ত্বচঃ স্পর্শবিষ-য়কং, নির্ব্বিকল্পকজ্ঞানং ব্যাপার ইতি ভাবঃ। পঞ্চানাং বাক্‌পাণি-

পাদপায়ূপস্থানাং পঞ্চকর্ম্মেন্দ্রিয়াণাং, বচনাদানবিহরণোৎসর্গানন্দাশ্চ, বৃত্তির্ব্যাপারঃ, বৃত্তিরত্রাপ্যনুষঞ্জনীয়া। তত্র বচনম্ উচ্যতে অনেনেতি ব্যুৎপত্ত্যা কণ্ঠতাল্বাদিক্রিয়া বাগিন্দ্রিয়স্য ব্যাপারঃ, আদানং গ্রহণং হস্তস্য, বিহরণং গমনং পাদয়োঃ, উৎসর্গঃ মলত্যাগানুকূলক্রিয়া পায়োঃ, আনন্দয়তীতি ব্যুৎপত্ত্যা রতিরূপস্থস্য ব্যাপার ইতি সমুদিততাৎপর্য্যম্॥ ২৮॥

মহদহঙ্কারমনসাং বৃত্তিমাহ,—

স্বালক্ষণ্যং বৃত্তিস্ত্রয়স্য সৈষা ভবত্যসামান্যা।
সামান্যকরণবৃত্তিঃ প্রাণাদ্যা বায়বঃ পঞ্চ॥ ২৯॥

ত্রযস্য মহদাদিত্রযস্য, মহতঃ অহঙ্কারস্য মনসশ্চেতি যাবৎ, স্বালক্ষণ্যং বৃত্তিঃ স্বমসাধারণং লক্ষণং স্বরূপং যেষাং তানি স্বলক্ষণানি মহদহঙ্কারমনাংসি তেষাং ভাবঃ স্বালক্ষণ্যং, তদেব তেষাং বৃত্তিঃ ব্যাপারঃ; তত্র মহতঃ অধ্যবসায়ঃ নিশ্চয়াপরপর্য্যায়ঃ ব্যাপারঃ, অহঙ্কারস্য অভিমানঃ, মনসঃ সঙ্কল্পঃ ব্যাপারঃ। সাধারণ্যাসাধারণ্যভেদেন বৃত্তের্দ্বৈবিধ্যমাহ, সৈষেতি সা এষাবৃত্তিঃ অসামান্যা, অসাধারণী ভবতি। সামান্যামাহ, সামান্যকরণেত্যাদি, প্রাণাদ্যাঃ পঞ্চবায়বঃ ত্রয়াণাং মহদাদিকরণনানাং সাধারণো ব্যাপারঃ, তথাচ মহদাদীনাং অন্বয়ে প্রাণাদীনামন্বয়ঃ তেষাং ব্যতিরেকে তেষাং ব্যতিরেকঃ, ইত্যন্বয়ব্যতিরেকাভ্যাং প্রাণাদীনাং মহদাদিব্যাপারত্বমিতি ভাবঃ। প্রাণঃ নাসাগ্রহৃন্নাভিপাদাঙ্গুষ্ঠবৃত্তিঃ, অপানঃ কৃকাটিকাপৃষ্ঠপাদপায়ূপস্থপার্শ্ববৃত্তিঃ। সমানঃ হৃন্নাভিসর্ব্বসন্ধিবৃত্তিঃ, উদানঃ হৃৎকণ্ঠতালুমূর্দ্ধভ্রূমধ্যবৃত্তিঃ। , ব্যানঃ সর্ব্বশরীরবৃত্তিঃ, ইত্যেবং পঞ্চবায়বঃ॥ ২৯॥

অসাধারণেষু ব্যাপারেষু ক্রমাক্রমৌ দর্শয়তি।

যুগপচ্চতুষ্টয়স্য হি বৃত্তিঃ ক্রমশশ্চ তস্য নির্দ্দিষ্টা।
দৃষ্টে তথাপ্যদৃষ্টে ত্রয়স্য তৎপূর্ব্বিকা বৃত্তিঃ।। ৩০ ॥

দৃষ্টে প্রত্যক্ষবিষয়ে, তস্য চতুষ্টয়স্য বাহ্যেন্দ্রিয়মনোঽহঙ্কারমহত্তত্ত্বস্য, যুগপৎ যৌগপদ্যেন, ক্রমশশ্চ ক্রমেণ চ, বৃত্তিঃ ব্যাপারঃ, নির্দ্দিষ্টা, তথা হি গাঢ়ান্ধকারে যস্য ব্যাঘ্রাদয়ঃ ইন্দ্রিয়সন্নিকৃষ্টা ভবন্তি তস্য যুগপদেব আলোচনাপরপর্য্যায়ং নির্ব্বিকল্পকং সঙ্কল্পাপরপর্য্যায়ং সবিকল্পকং, অভিমানঃ, নিশ্চয়াপরপর্য্যায়ঃ অধ্যবসায়শ্চ ভবতি, অতঃ স তৎক্ষণাদেব তস্মাৎ স্থানাৎ অপসরতি। এবং ক্রমেণ ব্যাপারো ভবতি তথাহি মন্দালোকে যস্য কিঞ্চিদ্বস্তু ইন্দ্রিয়সন্নিকৃষ্টং ভবতি তস্য প্রথমং ইদং কিঞ্চিদ্বস্তু ইতি নির্ব্বিকল্পকং, ততঃ অমুকোঽয়মিতি সবিকল্পকং, ততঃ অয়ং মাং জ্ঞাতবান্ ইত্যভিমানঃ, অনন্তরং তস্মাৎ স্থানাৎ অপসরণং কর্ত্তব্যং ইত্যধ্যবসায়শ্চ ভবতি। তথা অদৃষ্টেঽপি পরোক্ষবিষয়েঽপি, ত্রয়স্য বাহ্যেন্দ্রিয়রহিতস্য ত্রয়স্য মনসঃ অহঙ্কারস্য মহত্তত্ত্বস্য চ যুগপৎ ক্রমশশ্চ বৃত্তির্ভবতি সা চ বৃত্তিঃ তৎপূর্ব্বিকা দৃষ্টপূর্ব্বিকা তথাচ মনোজন্যস্মৃতৌ সংস্কারার্থং, অনুমানে ব্যাপ্তিজ্ঞানার্থং, শব্দে শক্ত্যনুমানার্থং প্রত্যক্ষাপেক্ষেতি-ভাবঃ। পরোক্ষবিষয়ে ইন্দ্রিয়াপ্রবৃত্তেঃ ত্রয়স্যেত্যুক্তম্॥ ৩০ ॥

নহু বাহ্যেন্দ্রিয়মনোঽহঙ্কারমহত্তত্ত্বানাং করণানাং ন যুগপদ্বৃত্তিঃ সম্ভবতি একব্যাপারস্য অপরব্যাপারাধীনত্বাদিত্যত আহ,

স্বাং স্বাং প্রতিপদ্যন্তে পরস্পরাকূতহেতুকাং বৃত্তিম্।
পুরুষার্থ এব হেতুর্ন কেনচিৎ কার্য্যতে করণম্ ॥৩১॥

যথা শাক্তীকযাষ্টীকাদয়ঃ পরাবস্কন্দায় প্রবৃত্তাঃ তত্র একস্য,

আকূতং অভিপ্রায়ং নির্ণীয় অপরঃ প্রবর্ত্ততে প্রবর্ত্তমানশ্চ শাক্তীকঃ শক্তিমেব গৃহ্লাতি ন তু যষ্ট্যাদিকং, তথা করণানাম্ একস্য প্রবৃত্ত্যু-ন্মুখত্বে অপরং প্রবৃত্ত্যুন্মুখং ভবতি, করণপক্ষে আকূতশব্দস্য প্রবৃত্ত্যু-ন্মুখত্বম্ অর্থঃ, ন ত্বভিপ্রায়ঃ, করণানাম্ অচেতনত্বাদিতি। নম্নু যাষ্টীকাদয়শ্চেতনত্বাৎ পরস্পরাকূতমবগম্য প্রবর্ত্তন্তে করণানি তু অচেতনানি কথং প্রবর্ত্তন্তে ইতি তেষামধিষ্ঠাতৃত্বেন ঈশ্বরঃ অপেক্ষ-ণীয় ইত্যত আহ পুরুষার্থ এবেত্যাদি ভোগাপবর্গলক্ষণঃ পুরুষার্থ এব তেষাং প্রবৃত্তৌ হেতুঃ, ন ত্বন্যেন কেনচিৎ করণং কার্য্যতে, প্রের্য্যতে, তথাচ জীবানামেব কর্ত্তৃত্বং ন তদর্থমীশ্বরাপেক্ষেতি ভাবঃ॥ ৩১॥

করণানি বিভজতে,

করণং ত্রয়োদশবিধং তদাহরণধারণপ্রকাশকরম্।
কার্য্যঞ্চ তস্য দশধাহার্য্যং ধার্য্যং প্রকাশ্যঞ্চ॥ ৩২॥

একাদশেন্দ্রিয়াণি বুদ্ধিরহঙ্কারশ্চ এতৎ ত্রয়োদশবিধং করণং ব্যাপা-রবতঃ কারণস্য করণত্বং তত্র কোঽয়ং ব্যাপার ইত্যাকাঙ্ক্ষায়ামাহ, তদাহরণেত্যাদি, তৎ ত্রয়োদশবিধং করণম্ আহরণধারণপ্রকাশকরং, বাগাদীনি কর্ম্মেন্দ্রিয়াণি আহরন্তি স্বস্বব্যাপারেণ স্বস্ববিষয়ং ব্যাপ্নুবন্তি ইত্যাহরণং কর্ম্মেন্দ্রিয়াণাং ব্যাপারঃ, বুদ্ধ্যহঙ্কারমনাংসি প্রাণাদিরূপয়া স্বকীয়ক্রিয়য়া শরীরং ধারয়ন্তি ইতি ধারণং তেষাং ব্যাপারঃ। আহ-রণধারণাদিক্রিয়াণাং সকর্ম্মকতয়া কিং কর্ম্ম, কতিবিধঞ্চ তৎ ইত্যত-আহ কার্য্যঞ্চেত্যাদি, তস্য ত্রয়োদশবিধকরণস্য, বচনাদানবিহরণোৎ-সর্গানন্দরূপম্ আহার্য্যং, শরীররূপং ধার্য্যং তচ্চ শরীরং পার্থিবাদি-ভেদেন পঞ্চবিধং, শব্দাদিরূপং প্রকাশ্যং, কার্য্যং কর্ম্ম, তৎ ত্রিবিধং কর্ম্ম দিব্যাদিব্যভেদেন দশবিধম্ ইতি॥ ৩২॥

ত্রয়োদশবিধান্তঃকরণস্যাবান্তরভেদমাহ,

অন্তঃকরণং ত্রিবিধং দশধা বাহ্যং ত্রয়স্য বিষয়াখ্যম্।
সম্প্রাতকালং বাহ্যং ত্রিকালমাভ্যন্তরং করণম্ ॥৩৩॥

অন্তঃকরণং মনোবুদ্ধ্যহঙ্কারভেদেন ত্রিবিধম্ এতৎ ত্রিবিধং শরীরাভ্যন্তরবৃত্তিত্বাদন্তঃকরণপদবাচ্যম্। বাহ্যং করণং পঞ্চকর্ম্মেন্দ্রিয় পঞ্চজ্ঞানেন্দ্রিয়ভেদাৎ দশবিধম্ এতৎ দশবিধবাহ্যেন্দ্রিয়ং ত্রয়স্য অন্তঃকরণত্রয়স্য বিষয়াখ্যং, বিষয়ম্ অন্তঃকরণত্রয়ব্যাপারম্ আখ্যাতি জনয়তীতি বিষয়াখ্যম্, অন্তঃকরণব্যাপারেষু বুদ্ধীন্দ্রিয়ব্যাপারস্য উপযোগিত্বং, কর্ম্মেন্দ্রিয়ব্যাপারস্যাপি বুদ্ধীন্দ্রিয়দ্বারা অন্তঃকরণব্যাপারে উপযোগিত্বং, কর্ম্মেন্দ্রিয়ব্যাপারেণ জনিতে পদার্থে বুদ্ধীন্দ্রিয়প্রবৃত্ত্যা অন্তঃকরণপ্রবৃত্তেঃ। বাহ্যান্তরয়োঃ করণয়োঃ বিশেষান্তরমাহ সাম্প্রতেত্যাদি, বাহ্যং করণং বহিরিন্দ্রিয়ং সাম্প্রতকালং বর্ত্তমানমাত্রবিষয়কম্, আভ্যন্তরং করণং মনোবুদ্ধ্যহঙ্কারাখ্যং, ত্রিকালম্ ইন্দ্রিয়সহকারেণ বর্ত্তমানবিষয়কম্ অনুমানশব্দসহকারেণাতীতানাগতবিষয়কমিতি ॥ ৩৩ ॥

বাহ্যেন্দ্রিয়াণাং বিষয়ান্ দর্শয়তি,

বুদ্ধীন্দ্রিয়াণি তেষাং পঞ্চ বিশেষাবিশেষবিষয়াণি।
বাগ্ভবতি শব্দবিষয়া শেষাণি তু পঞ্চবিষয়াণি ॥ ৩৪ ॥

দশানামিন্দ্রিয়াণাং মধ্যে বুদ্ধীন্দ্রিয়াণি বিশেষাবিশেষবিষয়াণি বিশেষাঃ যোগ্যাঃ স্থূলা ইতি যাবৎ, অবিশেষাঃ অযোগ্যাঃ সূক্ষ্মা ইতি যাবৎ তে এব বিষয়া যেষাং তথাবিধানি অস্মদাদীন্দ্রিয়াণাং যোগ্যমাত্রবিষয়কত্বং, যোগীন্দ্রিয়াণাং যোগ্যাযোগ্যবিষয়কত্বং, কর্ম্মেন্দ্রিয়াণাং

মধ্যে বাক্ শব্দবিষয়া স্থূলশব্দস্য জনিকা ন তু তন্মাত্ররূপসূক্ষ্মশব্দস্য, তস্য অহঙ্কারমাত্রজন্যত্বাৎ। তু পুনঃ শেষাণি পাণিপাদপায়ূপস্থানি, পঞ্চবিষয়াণি পাঞ্চভৌতিকঘটাদ্যাহার্য্যবিষয়কাণি, ঘটাদীনাং পঞ্চশব্দাদ্যাত্মকত্বাদিতি ॥ ৩৪ ॥

ত্রয়োদশসু অন্তঃকরণেষু কেষাঞ্চিৎ প্রাধান্যং কেষাঞ্চিচ্চাপ্রাধান্যমাহ,

সান্তঃকরণা বুদ্ধিঃ সর্ব্বং বিষয়মবগাহতে যস্মাৎ।
তস্মাৎ ত্রিবিধং করণং দ্বারি দ্বারাণি শেষাণি ॥ ৩৫ ॥

সান্তঃকরণা অন্তঃকরণাভ্যাং মনোঽহঙ্কারাভ্যাং সহিতা বুদ্ধিঃ মহত্তত্ত্বং, যস্মাৎ সর্ব্ববিষয়ম্, ইন্দ্রিয়সন্নিকৃষ্টং সমস্তং বিষয়ম্ অবগাহতে অধ্যবস্যতি, তস্মাৎ ত্রিবিধং করণং মনোঽহঙ্কারবুদ্ধিরূপং করণত্রয়ং দ্বারি প্রধানং, শেষাণি বাহ্যেন্দ্রিয়াণি দ্বারাণি অপ্রধানানি ইতি ॥ ৩৫ ॥

ন কেবলং বুদ্ধেঃ বাহ্যেন্দ্রিয়েভ্যঃ প্রাধান্যম্ অপি তু মনোঽহঙ্কারাভ্যামপি প্রাধান্যমিত্যাহ,

এতে প্রদীপকল্পাঃ পরস্পরবিলক্ষণা গুণবিশেষাঃ।
কৃৎস্নং পুরুষস্যার্থং প্রকাশ্য বুদ্ধৌ প্রযচ্ছন্তি ॥ ৩৬ ॥

প্রদীপকল্পাঃ প্রদীপতুল্যাঃ পরস্পরবিলক্ষণা পরস্পরবিরোধশীলা অপি গুণবিশেষাঃ সত্ত্বরজস্তমসাং বিকাররূপাঃ এতে বাহ্যেন্দ্রিয়মনোঽহঙ্কারাঃ কৃৎস্নং সমস্তং পুরুষস্যার্থং ভোগাপবর্গলক্ষণং পুরুষার্থং, প্রকাশ্য বুদ্ধৌ প্রযচ্ছন্তি সমর্পয়ন্তি, ইতি বুদ্ধেঃ অন্যকরণাপেক্ষয়া প্রাধান্যম্। তথাচ যথা বর্ত্তিতৈলাগ্নয়ঃ পরস্পরবিরোধশীলা অপি

অন্ধকারাপনয়নেন রূপপ্রকাশায় প্রদীপরূপতাং প্রাপ্য অর্থং প্রকাশ্য পুরুষেষু সমর্পয়ন্তি। যথা চ গ্রামাধ্যক্ষঃ প্রজাভ্যঃ করমাদায় বিষয়াধ্যক্ষায় বিষয়াধ্যক্ষঃ সর্ব্বাধ্যক্ষায় সর্ব্বাধ্যক্ষঃ রাজ্ঞে সমর্পয়তি তথা বাহ্যেন্দ্রিয়ম্ আলোচ্য মনসে মনঃ সঙ্কল্প্য অহঙ্কারায় অহঙ্কারশ্চাভিমত্য সর্ব্বাধ্যক্ষভূতায়াং বুদ্ধৌ পুরুষার্থং প্রকাশ্য সমর্পয়তীতি ভাবঃ॥ ৩৬॥

বুদ্ধেরেব প্রাধান্যং ন তু মনোঽহঙ্কারয়োরিত্যত্র যুক্তিমাহ,

সর্ব্বং প্রত্যুপভোগং যস্মাৎ পুরুষস্য সাধয়তি বুদ্ধিঃ।
সৈব চ বিশিনষ্টি পুনঃ প্রধানপুরুষান্তরং সূক্ষ্মম্॥৩৭॥

যস্মাৎ বুদ্ধিঃ সর্ব্বং শব্দাদিবিষয়ং প্রতি পুরুষস্য উপভোগং সাধয়তি তস্মাৎ মনোঽহঙ্কারাদ্যপেক্ষয়া প্রাধান্যবতী। তথাচ যথা সর্ব্বাধ্যক্ষস্য সাক্ষাৎ রাজার্থসাধনতয়া গ্রামাধ্যক্ষাদ্যপেক্ষয়া প্রাধান্যং তথা বুদ্ধেঃ পুরুষসান্নিধ্যাৎ তচ্ছায়াপত্ত্যা তদ্রূপতয়া সাক্ষাৎপুরুষোপভোগসাধনতয়া প্রাধান্যমিতি ভাবঃ। নন্বু বুদ্ধেঃ পুরুষস্য উপভোগসাধনত্বে অনির্ম্মোক্ষঃ স্যাদিত্যত আহ সৈবেত্যাদি, সৈব বুদ্ধিরেব, পুনঃ বিবেকদশায়াং, সূক্ষ্মং দুর্জ্ঞেয়ং প্রধানপুরুষান্তরং প্রধানপুরুষয়োরন্তরং বৈলক্ষণ্যং ভেদমিতি যাবৎ, বিশিনষ্টি,—বিষয়ীকরোতি, তথাচ সংসারদশায়াং পুরুষোপভোগসাধিকায়া অপি বুদ্ধেঃ বিবেকদশায়াং তত্ত্বজ্ঞানসাধকত্বাৎ নানির্ম্মোক্ষপ্রসঙ্গ ইতি ভাবঃ॥ ৩৭॥

করণানি বিভজ্য বিশেষাবিশেষান্ বিভজতে,

তন্মাত্রাণ্যবিশেষাস্তেভ্যোভূতানি পঞ্চ পঞ্চভ্যঃ।
এতে স্মৃতা বিশেষাঃ শান্তা ঘোরাশ্চ মূঢ়াশ্চ॥ ৩৮॥

তন্মাত্রাণি শব্দতন্মাত্রাদীনি, অবিশেষাঃ অযোগ্যাঃ সূক্ষ্মা ইতি

যাবৎ, পঞ্চভ্যঃ তেভ্যঃ তন্মাত্রেভ্যঃ পঞ্চভূতানি পৃথিব্যাদীনি পঞ্চস্থূল-ভূতানি, এতে পৃথিব্যাদয়ঃ বিশেষাঃ যোগ্যাঃ স্থূলা ইতি যাবৎ, কুত ইত্যত আহ, শান্তা ইত্যাদি, চ একোহেতৌ দ্বিতীয়ঃ সমুচ্চয়ে, যস্মাৎ আকাশাদিস্থূলভূতেষু কেচিৎ শান্তাঃ সত্ত্বগুণপ্রধানতয়া সুখ-করাঃ প্রকাশকরাঃ লঘবশ্চ, কেচিৎ রজোগুণপ্রধানতয়া, ঘোরাঃ দুঃখকরাঃ চঞ্চলাশ্চ, কেচিৎ তমোগুণপ্রধানতয়া মূঢ়াঃ মোহকরাঃ গুরবশ্চেতি ॥ ৩৮ ॥

বিশেষাণাং অবান্তারভেদমাহ,

সূক্ষ্মা মাতাপিতৃজা সহ প্রভূতৈঃ ত্রিধা বিশেষাঃ স্যুঃ।
সূক্ষ্মাস্তেষাং নিয়তা মাতাপিতৃজা নিবর্ত্তন্তে ॥৩৯॥

বিশেষাঃ পূর্ব্বোক্তবিশেষাঃ প্রভূতৈঃ সহ প্রকৃষ্টানি মহান্তি ভূতানি ঘটাদীনি তৈঃ সহ সূক্ষ্মাঃ, লিঙ্গদেহাখ্যাঃ, মাতাপিতৃজাঃ, স্থূলদেহাখ্যাঃ অতস্ত্রিধা ত্রিবিধাঃ স্যুঃ। তথাচ লিঙ্গশরীরম্ একোবিশেষঃ স্থূলশরীরম্ একোবিশেষঃ ঘটাদিরূপো মহাভূতবর্গঃ একোবিশেষ ইতি ভাবঃ। লিঙ্গশরীরস্থূলশরীরয়োর্বিশেষমাহ সূক্ষ্মাস্তেষামিত্যাদি, তেষাং বিশে-ষাণাং মধ্যে, সূক্ষ্মাঃ লিঙ্গদেহাঃ, নিয়তাঃ নিত্যাঃ মোক্ষপর্য্যন্তাবস্থায়িন-ইতি যাবৎ, মাতাপিতৃজাঃ স্থূলদেহাঃ নিবর্ত্তন্তে মরণকালে নিপতন্তি ইতি ॥ ৩৯ ॥

লিঙ্গশরীরধর্ম্মানাহ,

পূর্ব্বোৎপন্নমসক্তং নিয়তং মহদাদিসূক্ষ্মপর্য্যন্তম্।
সংসরতি নিরুপভোগং ভাবৈরধিবাসিতং লিঙ্গম্॥৪০॥

লিঙ্গং লিঙ্গশরীরং, পূর্ব্বোৎপন্নং পূর্ব্বস্মিন্ আদিসর্গে পূর্ব্বস্মাৎ প্রধানাৎ উৎপন্নং আবির্ভূতম্, অসক্তম্ অব্যাহতং, শিলাদিষপ্যনু-

প্রবেশে কেনচিৎ ন প্রতিরুদ্ধং, নিয়তং প্রত্যাত্মভিন্নং, মহদাদিসূক্ষ্ম-পর্য্যন্তং মহদহঙ্কারৈকাদশেন্দ্রিয়তন্মাত্রসমুদায়রূপং, সংসরতি নবং নবং স্থূলশরীরং গৃহ্নাতি পূর্ব্বং পূর্ব্বং পরিত্যজতি, নিরুপভোগং স্থূলদেহং বিনা ভোগাসমর্থং, ভাবৈরধিবাসিতং ধর্ম্মাধর্ম্মজ্ঞানাজ্ঞান-বৈরাগ্যাবৈরাগ্যৈশ্বর্য্যানৈশ্বর্য্যানি ভাবাঃ তদন্বিতা বুদ্ধিঃ তদন্বিতঞ্চ সূক্ষ্মশরীরমিতি তদপি ভাবৈরধিবাসিতং, তথাচ যথা সুরভিচম্পক-সম্পর্কাৎ বসনং তদীয়সুরভিগন্ধবাসিতং ভবতি তথা ভাবাষ্টকান্বিত-বুদ্ধিসম্পর্কাৎ, লিঙ্গশরীরমপি ভাবাষ্টকান্বিতং ভবতীতি ভাবঃ॥ ৪০ ॥

নন্থ সাহঙ্কারেন্দ্রিয়বুদ্ধিত এব ভোগসম্ভবে কৃতং সূক্ষ্মশরীরাঙ্গী-কারেণেত্যত আহ।

চিত্রং যথাশ্রয়মৃতে স্থাণ্বাদিভ্যো বিনা যথা চ্ছায়া।
তদ্বদ্বিনা বিশেষৈর্ন তিষ্ঠতি নিরাশ্রয়ং লিঙ্গম্॥৪১।

আশ্রয়ং বিনা চিত্রং যথা ন তিষ্ঠতি, স্থাণ্বাদিকং বিনা ছায়া যথা ন তিষ্ঠতি তদ্বৎ বিশেষৈঃ সূক্ষ্মশরীরৈঃ বিনা লিঙ্গং লিঙ্গনাৎ জ্ঞাপনাৎ ইতি ব্যুৎপত্ত্যা লিঙ্গপদপ্রতিপাদ্যং বুদ্ধ্যাদিকং নিরাশ্রয়ং সূক্ষ্মশরীর-রূপাশ্রয়রহিতং সৎ ন তিষ্ঠতি, অতঃ তেষামাশ্রয়ত্বেন সূক্ষ্মশরীর-সিদ্ধিঃ। অঙ্গুষ্ঠমাত্রং পুরুষং নিশ্চকর্ষ যমোবলাৎ ইত্যাগমস্যাপি অস্য সিদ্ধৌ প্রমাণত্বম্ আত্মনোনিষ্কর্ষাসম্ভবেন সূক্ষ্মশরীরস্যৈবাত্র পুরুষপদার্থত্বং তথাচ সূক্ষ্মশরীরাভাবে উক্তাগমস্যাপ্রামাণ্যাপত্তিরিতি ভাবঃ॥ ৪১ ॥

সূক্ষ্মশরীরং যথা যেন হেতুনা সংসরতি তদাহ,

পুরুষার্থহেতুকমিদং নিমিত্তনৈমিত্তিকপ্রসঙ্গেন।
প্রকৃতের্বিভুত্বযোগাৎ নটবদ্ব্যবতিষ্ঠতে লিঙ্গম্॥৪২॥

ইদং লিঙ্গং সূক্ষ্মশরীরং নিমিত্তনৈমিত্তিকপ্রসঙ্গেন নিমিত্তং ধর্ম্মাদিকং নৈমিত্তিকং ধর্ম্মাদিকারণজন্যস্থূলদেহাদিকং তদুভয় প্রসঙ্গেন তদুভয়সম্বন্ধেন, নটবদ্‌ব্যবতিষ্ঠতে, যথা নটঃ কদাচিৎ পরশুরামো বা যুধিষ্ঠিরো বা বৎসরাজো বা ভবতি তথা লিঙ্গশরীরং কদাচিৎ অদৃষ্ট-বশাৎ দেবো বা মনুষ্যো বা পশুর্ব্বা বনস্পতির্ব্বা ভবতীত্যর্থঃ। কথ-মীদৃশং ব্যবহরতি ইত্যত আহ পুরুষার্থহেতুকমিদমিতি, পুরুষার্থঃ পুরুষপ্রয়োজনং হেতুর্নিমিত্তং যস্য ইতি ব্যুৎপত্ত্যা পুরুষপ্রয়োজন-ফলকমিত্যর্থঃ, তথাচ তত্তদ্ভোগাদৃষ্টবশাৎ তত্তদ্ভোগার্থমেব তথা ব্যব-হরন্তীতি ভাবঃ। কুতোঽস্য এবম্বিধো মহিমা ইত্যত আহ, প্রকৃতেঃ বিভুত্বযোগাদিতি, প্রকৃতেঃ প্রধানস্য বিভুত্বযোগাৎ, বিশ্বরূপতাসাম-র্থ্যাৎ, তথাচোক্তং, বৈশ্বরূপ্যং প্রধানস্য পরিণামোঽয়মদ্ভুতঃ, ইতি ॥ ৪২ ॥

নিমিত্তনৈমিত্তিকপ্রসঙ্গেনেত্যুক্তং তত্র নিমিত্তং নৈমিত্তিকঞ্চ বিভজ্যতে,—

সাংসিদ্ধিকাশ্চ ভাবাঃ প্রাকৃতিকা বৈকৃতিকাশ্চ ধর্ম্মাদ্যাঃ।
দৃষ্টাঃ করণাশ্রয়িণঃ কার্য্যাশ্রয়িণশ্চ কললাদ্যাঃ ॥৪৩॥

ধর্ম্মাদ্যাঃ ধর্ম্মজ্ঞানৈশ্বর্য্যরূপাঃ যে ভাবাঃ সাংসিদ্ধিকাঃ স্বাভা-বিকাঃ ত এব 'প্রাকৃতিকাঃ' নিমিত্তরূপাঃ, অতএব সর্গাদৌ ভগবান্ কপিলমহামুনিঃ ধর্ম্মজ্ঞানৈশ্বর্য্যসম্পন্নঃ প্রাদুর্ব্ভূবেতি স্মরন্তি। যে ভাবাঃ অসাংসিদ্ধিকাঃ তে 'বৈকৃতিকাঃ' নৈমিত্তিকাঃ উপায়ানুষ্ঠানোৎ-পন্না ইতি যাবৎ, অতএব প্রাচেতসপ্রভৃতয়োমহর্ষয়ঃ উপায়ানুষ্ঠানেন ধর্ম্মাদিকম্ উৎপাদয়ন্তি। তেষাং মধ্যে যে ধর্ম্মাদ্যাঃ তে 'করণা-শ্রয়িণঃ' করণং বুদ্ধিতত্ত্বম্ আশ্রয়ন্তি। তেষাং মধ্যে যে কললাদ্যাঃ

তে কার্য্যাশ্রয়িণঃ, কার্য্যং শরীরম্ আশ্রয়ন্তি, কললাদ্যা ইত্যাদিপদেন বুদ্বুদমাংসপেশীকরণ্ডাঙ্গপ্রত্যঙ্গপরিগ্রহ ইতি ভাবঃ ॥ ৪৩ ॥

বুদ্ধিনিষ্ঠানাং ধর্ম্মাদীনাং প্রয়োজনমাহ,

ধর্ম্মেণ গমনমূর্দ্ধং গমনমধস্তাদ্ভবত্যধর্ম্মেণ।
জ্ঞানেন চাপবর্গো বিপর্য্যয়াদিষ্যতে বন্ধঃ ॥ ৪৪ ॥

ধর্ম্মেণ যাগাদিজনিতাদৃষ্টেন 'ঊর্দ্ধং' স্বর্গাদিলোকেষু, গমনম্, অধর্ম্মেণ নিন্দিতকর্ম্মজনিতদুরদৃষ্টেন অধস্তাৎ নরকেষু, গমনম্। জ্ঞানেন তত্ত্বজ্ঞানেন প্রকৃতিপুরুষয়োর্ভেদজ্ঞানেনেতি যাবৎ, অপবর্গঃ মোক্ষঃ, বিপর্য্যয়াৎ অতত্ত্বজ্ঞানাৎ, বন্ধঃ সংসারঃ ইষ্যতে, স চ বন্ধঃ ত্রিবিধঃ প্রাকৃতিকবৈকৃতিকদাক্ষিণকভেদাৎ, তত্র প্রকৃতাবাত্মবুদ্ধ্যা যে প্রকৃতিমুপাসতে তেষাং প্রাকৃতিকোবন্ধঃ, যে ভূতেন্দ্রিয়াহঙ্কারবুদ্ধিরূপান্ বিকারান্ আত্মবুদ্ধ্যা উপাসতে তেষাং বৈকৃতিকোবন্ধঃ, যে পুরুষমজানন্তঃ কামনয়া বৈদিককর্ম্মাণ্যনুতিষ্ঠন্তি তেষাং দাক্ষিণকোবন্ধ ইতি ॥ ৪৪ ॥

তত্ত্বজ্ঞানস্যৈব মোক্ষোপায়ত্বেন তত্ত্বজ্ঞানরহিতস্য বিরক্তস্যাপি ন মোক্ষ ইত্যাশয়েনাহ,—

বৈরাগ্যাৎ প্রকৃতিলয়ঃ সংসারোভবতি রাজসাদ্রাগাৎ।
ঐশ্বর্য্যাদবিঘাতোবিপর্য্যয়াৎ তদ্বিপর্য্যাসঃ ॥ ৪৫ ॥

বৈরাগ্যাৎ তত্ত্বজ্ঞানরহিতস্য বৈরাগ্যমাত্রাৎ, প্রকৃতিলয়ঃ প্রকৃতিপদেন প্রকৃতিকার্য্যমহদহঙ্কারভূতেন্দ্রিয়াণি গৃহ্যন্তে তেষু আত্মবুদ্ধ্যা উপাস্যমানেষু লয়ঃ ভবতীত্যর্থঃ। রাজসাৎ রজোগুণকার্য্যাৎ রাগাৎ কামক্রোধাদেঃ, সংসারো ভবতি, তত্র যাগাদিগোচররাগাৎ

পারলৌকিকস্বর্গাদিভোগো ভবতি, স্রক্‌চন্দনবনিতাদিগোচররাগাৎ ঐহিকসুখভোগাদিকং ভবতি এতাবানেব বিশেষঃ। ঐশ্বর্য্যাৎ অণিমাদিলক্ষণৈশ্বর্য্যাৎ, অবিঘাতঃ ইচ্ছায়াঃ অপ্রতিরোধঃ, ঈশ্বরো হি যদ্‌যদিচ্ছতি তত্তদেব করোতি ন ত্বনীশ্বরঃ, বিপর্য্যযাৎ অনৈশ্বর্য্যাৎ, তদ্বিপর্য্যাসঃ সর্ব্বত্রেচ্ছাবিঘাত ইতি॥ ৪৫॥

বিপর্য্যয়াদীনাং সাংখ্যমতসিদ্ধানাং ন তত্ত্বান্তরত্বমপি তু বুদ্ধ্যাদাবেবান্তর্ভাব ইত্যাহ,—

এষ প্রত্যয়সর্গো বিপর্য্যয়াশক্তিতুষ্টিসিদ্ধ্যাখ্যঃ।
গুণবৈষম্যবিমর্দ্দাৎ তস্য চ ভেদস্তু পঞ্চাশৎ॥ ৪৬॥

বিপর্য্যযশ্চ অশক্তিশ্চ তুষ্টিশ্চ সিদ্ধিশ্চ তা আখ্যা নামানি যস্য এষ গণঃ প্রত্যয়সর্গঃ প্রতীয়তে অনেনেতি ব্যুৎপত্ত্যা প্রত্যযোবুদ্ধিঃ তস্য সর্গঃ তস্য জন্যঃ, তথাচ কার্য্যকারণযোরভেদাৎ অবিদ্যাপরপর্য্যায-বিপর্য্যয়াদিগণস্য বুদ্ধিতত্ত্বেঽন্তর্ভাবাৎ ন তত্ত্বান্তরত্বমিতি ভাবঃ। তস্য বিপর্য্যযাদিগণস্য, পঞ্চাশদ্‌ভেদাঃ। ননু কথমেকস্মাৎ কারণাৎ বিভিন্নানি কার্য্যাণি ইত্যাশঙ্কায়ামাহ গুণবৈষম্যবিমর্দ্দাদিতি, গুণানাং সত্ত্বরজস্তমসাং বৈষম্যম্, একৈকস্যাধিকবলতা দ্বযোর্দ্বয়োর্বা একৈকস্য ন্যূনবলতা দ্বযোর্দ্বযোর্বা, তেনোপমর্দ্দঃ, একৈকস্য ন্যূণবলস্য-দ্বয়োর্দ্বয়োর্বা অভিভবঃ তস্মাৎ কার্য্যভেদ ইতি॥ ৪৬॥

পঞ্চাশদিতি সামান্যত উক্তং, তত্র কস্য কতিবিধোভেদস্তমাহ,।

পঞ্চবিপর্য্যয়ভেদাভবন্ত্যশক্তিস্তু করণবৈকল্যাৎ।
অষ্টাবিংশতিভেদা তুষ্টির্নবধাঽষ্টধাসিদ্ধিঃ॥ ৪৭॥

অবিদ্যাস্মিতারাগদ্বেষাভিনিবেশভেদেন বিপর্য্যয়ঃ পঞ্চবিধঃ ত ত্রব

যথাক্রমং তমোমোহমহামোহতামিস্রান্ধতামিস্রসংজ্ঞকা ভবন্তি। করণবৈকল্যাৎ করণানাম্ ইন্দ্রিয়াণাং বৈকল্যাৎ বৈগুণ্যাৎ অশক্তিঃ অষ্টাবিংশতিভেদা, যথা অশক্তিঃ অষ্টাবিংশতিভেদা ভবতি তদগ্রে বক্ষ্যতে। তুষ্টির্নবধা সিদ্ধিশ্চ অষ্টবিধা এতদপি অগ্রে বক্ষ্যত-ইতি ॥ ৪৭ ॥

পঞ্চানাং বিপর্য্যয়াণাম্ অবান্তরভেদমাহ,—

ভেদস্তমসোঽষ্টবিধো মোহস্য চ দশবিধোমহামোহঃ।
তামিস্রোঽষ্টাদশধা তথা ভবত্যন্ধতামিস্রঃ ॥ ৪৮ ॥

অষ্টসু প্রকৃতিমহদহঙ্কারপঞ্চতন্মাত্রেষু অনাত্মসু আত্মবুদ্ধিরবিদ্যা, তস্যাএব তম ইতি সংজ্ঞা, তথাচ তাদৃশসংজ্ঞাপ্রতিপাদ্যায়াঃ অবিদ্যায়াঃ প্রকৃত্যাদ্যষ্টবিধবিষয়কত্বাৎ অষ্টবিধত্বম্। অনিমাদ্যষ্টবিধৈশ্বর্য্যং প্রাপ্য সিদ্ধোঽহমস্মীত্যভিমানবিশেষঃ অস্মিতা সৈব মোহসংজ্ঞিকা তস্যা অণিমাদ্যষ্টবিধৈশ্বর্য্যবিষয়কত্বাৎ অষ্টবিধত্বং, মোহস্য চেতি চকারেণ তত্রাপি অষ্টবিধোভেদ ইত্যনুষজ্যতে। শব্দাদিষু পঞ্চসু বিষয়েষু দিব্যাদিব্যতয়া দশবিধেষু উপাদেয়ত্ববুদ্ধ্যা আসক্তিঃ রাগঃ স এব মহামোহসংজ্ঞকঃ তদ্বিষয়স্য দশবিধত্বাৎ তস্য দশবিধত্বম্। পরেণ ভুজ্যমানেষু দশসু শব্দাদিবিষয়েষু পরেণ প্রাপ্তেষু চাণিমাদ্যষ্টবিধৈশ্বর্য্যেষু দ্বেষঃ স এব তামিস্রাখ্যঃ তস্যাষ্টাদশবিষয়কত্বাৎ অষ্টাদশবিধত্বম্। অস্মল্লব্ধানাং দিব্যাদিব্যভেদেন দশবিধানাং ভোগ্যশব্দাদীনাম্ অণিমাদ্যষ্টবিধৈশ্বর্য্যাণাঞ্চ কদাচিৎ ব্যাঘাতঃ সম্ভবতীত্যেবং ত্রাসঃ অভিনিবেশঃ স এবান্ধতামিস্রসংজ্ঞকঃ তস্যাপি অষ্টাদশবিষয়কত্বাদষ্টাদশবিধত্বম্। তদেবং বিপর্য্যয়স্য দ্বিষষ্টিবিধত্বমিতি ॥৪৮॥

অশক্তেরষ্টাবিংশতিভেদানাহ,—

একাদশেন্দ্রিয়বধাঃ সহ বুদ্ধিবধৈরশক্তিরুদ্দিষ্টা।
সপ্তদশধা চ বুদ্ধের্বিপর্য্যয়াৎ তুষ্টিসিদ্ধীনাম্ ॥ ৪৯ ॥

একাদশেন্দ্রিয়াণি শ্রোত্রত্বগক্ষিরসনঘ্রাণবাক্‌পাণিপাদপায়ূপস্থ-মনাংসি, তেষাং বধাঃ যথাক্রমং বাধির্য্যকুষ্ঠিতান্ধত্বজড়তাঽজিঘ্রতা-মূকতাকৌণ্যপঙ্গুত্বক্লৈব্যোদাবর্ত্তমন্দতাখ্যানি বৈগুণ্যানি, বুদ্ধিবধৈঃ সহ স্বরূপতো বুদ্ধিবৈগুণ্যৈঃ সহ, অশক্তিঃ বুদ্ধেরশক্তিঃ, উদ্দিষ্টা অষ্টাবিংশতিধা উৎকীর্ত্তিতা ইন্দ্রিয়বৈগুণ্যজনিতায়াঃ ইন্দ্রিয়নিষ্ঠাশক্তেঃ কার্য্যকারণয়োরভেদাৎ বুদ্ধিনিষ্ঠত্বম্। কতি বুদ্ধেঃ স্বরূপতোবৈগুণ্যানি তত্রাহ, সপ্তদশধেতি, নববিধতুষ্টীনাম্ অষ্টবিধসিদ্ধীনাঞ্চ বিপর্য্যযাৎ ব্যতিরেকাৎ, বুদ্ধিবৈগুণ্যানি সপ্তদশবিধানি তথাচ নববিধতুষ্টিব্যতি-রেকস্য নবসংখ্যাঘটিতত্বাৎ অষ্টবিধসিদ্ধিব্যতিরেকস্য অষ্টসংখ্যাঘটিত-ত্বাচ্চ বুদ্ধিবধানাং সপ্তদশবিধত্বমিতি ভাবঃ ॥ ৪৯ ॥

তুষ্টের্নবভেদানাহ,

আধ্যাত্মিক্যশ্চতস্রঃ প্রকৃত্যুপাদানকালভাগ্যাখ্যাঃ।
বাহ্যা বিষয়োপরমাৎ পঞ্চ নব তুষ্টয়োঽভিমতাঃ ॥৫০॥

প্রকৃত্যুপাদানকালভাগ্যানি আখ্যা যাসাং তা আধ্যাত্মিক্যস্তুষ্টয়ঃ চতস্রঃ, প্রকৃতিব্যতিরিক্তাত্মানমধিকৃত্য যত এতাস্তুষ্টয়ো জায়ন্তে অতঃ এতাসাং আধ্যাত্মিকত্বম্। প্রকৃত্যাদিভিন্নত্বেন আত্মসাক্ষাৎ-কারো মোক্ষোপায়ঃ তস্য চ প্রকৃতিপরিণামবিশেষত্বাৎ প্রকৃতিত এব সম্ভবঃ অতস্তে ধ্যানাভ্যাসপ্রয়াসো বৃথা ইত্যুপদেশে যা তুষ্টিঃ সা প্রকৃত্যাখ্যা তুষ্টিরম্ভ উচ্যতে। প্রকৃতিমাত্রস্য সর্ব্বান্‌প্রত্যবিশেষাৎ

আত্মসাক্ষাৎকারে প্রব্রজ্যোপাদানম্ আবশ্যকম্ অতো ধ্যান-প্রয়াসেন বৃথা ইত্যুপদেশে যা তুষ্টিঃ সা উপাদানাখ্যা সলিল-মুচ্যতে। প্রব্রজ্যাপি ন সদ্যো নির্ব্বাণদা সাপি কালবিশেষ-মপেক্ষতে অতঃ ক্লেশেন বৃথা ইত্যুপদেশে যা তুষ্টিঃ সা কালাখ্যা তুষ্টিঃ মেঘ উচ্যতে, ওঘ উচ্যতে ইত্যুক্তং বাচস্পতিমিশ্রৈঃ। কাল-বিশেষেঽপি স ভাগ্যবলাদেব ভবতি অতো ভাগ্যমেব হেতুর্নান্যৎ ইত্যুপদেশে যা তুষ্টিঃ সা ভাগ্যাখ্যা তুষ্টিঃ বৃষ্টিরুচ্যতে এতাশ্চতস্রঃ আধ্যাত্মিক্যস্তুষ্টয়ঃ। বাহ্যা তুষ্টীরাহ বাহ্যা বিষয়োপরমাৎ ইতি, প্রকৃতিমহদহঙ্কারাদীনি আত্মেত্যভিমন্যমানস্য অনাত্মানমধিকৃত্য যাস্তুষ্টয়ো ভবন্তি তা বাহ্যাস্তুষ্টয়ঃ বিষয়োপরমাৎ উপরম্যতে অনে-নেতি ব্যুৎপত্ত্যা উপরমঃ বৈরাগ্যং, বিষয়াঃ শব্দাদয়ঃ পঞ্চ তেভ্য উপ-রমঃ বৈরাগ্যং তস্মাদিত্যর্থঃ, অর্জ্জনরক্ষণক্ষয়ভোগহিংসাসু দোষ-দর্শনাৎ পঞ্চোপরমাভবন্তি, তদ্ধেতুকত্বাৎ তুষ্টয়োঽপি পঞ্চ ভবন্তি। তথাচ অর্জ্জনোপায়াঃ সেবাদয়ঃ সেবকদুঃখপ্রদাঃ অতস্তেষাং প্রয়াসো বৃথা ইতি চিন্তয়তো বিষয়োপরমে যা তুষ্টিঃ সা পারমুচ্যতে। কথঞ্চিদ-র্জ্জিতস্য ধনস্য চৌরাদিতো রক্ষণং ক্লেশকরং ইতি চিন্তযতো বিষয়ো-পরমে যা তুষ্টিঃ সা সুপারমুচ্যতে কথঞ্চিদ্রক্ষিতমপি ভোগাদবশ্যং ক্ষয়ং প্রাপ্স্যতি ইতি ভাবয়তো বিষয়োপরমে যা তুষ্টিঃ সা পারাপারমুচ্যতে। শব্দাদিবিষয়ভোগাভ্যাসাৎ উত্তরোত্তরং কামা বর্দ্ধন্তে তে চ বিষয়া-প্রাপ্তৌ কামিনং দুঃখয়ন্তি ইতি ভাবয়তো বিষয়োপরমে যা তুষ্টিঃ সা অনুত্তমাম্ভ উচ্যতে। এবং ভোগেঽবশ্যং প্রাণিহিংসা জায়ত-এবেতি দোষদর্শনাৎ বিষয়োপরমে যা তুষ্টিঃ সা উত্তমাম্ভ উচ্যতে। তদেবমাধ্যাত্মিকীভিশ্চতসৃভির্বাহ্যাভিঃ পঞ্চভির্নব তুষ্টয়োঽভিমতা-ইতি ॥৫০॥

অষ্টসিদ্ধীরাহ,

উহঃ শব্দোঽধ্যয়নং দুঃখবিঘাতাস্ত্রয়ঃ সুহৃৎপ্রাপ্তিঃ।
দানঞ্চ সিদ্ধয়োঽষ্টৌ সিদ্ধেঃ পূর্ব্বোঽঙ্কুশস্ত্রিবিধঃ॥৫১

অধ্যয়নং গুরুমুখাৎ আধ্যাত্মিকশাস্ত্রার্থশ্রবণম্, এতদেব প্রথমা-সিদ্ধিঃ তারমুচ্যতে। শব্দঃ অধ্যয়নজনিতশব্দার্থজ্ঞানম্ এতদেব দ্বিতীয়া সিদ্ধিঃ, সুতারমুচ্যতে, অত্র শব্দপদং শব্দার্থজ্ঞানলক্ষকং, উহঃ, বেদাবিরোধী তর্কঃ এতেন পূর্ব্বপক্ষনিরাকরণম্ উত্তরপক্ষব্যবস্থাপনঞ্চ ভবতি, এষ এব তৃতীয়া সিদ্ধিঃ তারতারমুচ্যতে। সুহৃৎপ্রাপ্তিঃ, আধ্যাত্মিকজনসংসর্গঃ এষা চতুর্থী সিদ্ধিঃ রম্যকমুচ্যতে। দান-মিতি পদং দৈপশোধনে ইতি ধাতুনা নিষ্পন্নং অ গঃ বাহ্যাভ্যন্তরশৌচং তদর্থঃ এতদেব পঞ্চমী সিদ্ধিঃ সদামুদিতমুচ্যতে। দুঃখবিঘাতাস্ত্রয়ঃ, দুঃখবিঘাতাঃ দুঃখশমনোপায়াঃ ত্রয়ঃ ত্রিবিধাঃ, দুঃখানাং ত্রিত্বাৎ দুঃখশমনোপায়ানামপি ত্রিত্বং এতাঃ সিদ্ধয়ঃ মুখ্যাঃ যথাক্রমং প্রমোদ-মুদিত-মোদমানা উচ্যন্তে, অন্যাঃ সিদ্ধয়ঃ গৌণ্যাঃ, ইত্যষ্টৌ সিদ্ধয়ঃ। এতাসাং সিদ্ধীনাম্ উপাদেয়ত্বং বিপর্য্যয়াশক্তিতুষ্টীনাস্তু হেয়ত্বমিতি জ্ঞাপয়িষ্যন্নাহ, সিদ্ধেরিত্যাদি, পূর্ব্বঃ পূর্ব্বোক্তঃ ত্রিবিধঃ বিপর্য্যয়া-শক্তিতুষ্টিরূপস্ত্রিবিধঃ, সিদ্ধেরঙ্কুশঃ সিদ্ধেঃ প্রতিবন্ধকঃ, অত এতাসাং হেয়ত্বমিতি॥ ৫১॥

বিষয়ং বিনা ভোগো ন সম্ভবতীতি আকাশাদিবিষয়সৃষ্টিঃ স-প্রয়োজনাস্তু মহদাদ্যতীন্দ্রিয়সৃষ্টৈঃ কিং প্রয়োজনমিত্যত আহ,

ন বিনা ভাবৈর্লিঙ্গং ন বিনা লিঙ্গেন ভাবনির্বৃত্তিঃ।
লিঙ্গাখ্যোভাবাখ্যস্তস্মাৎ দ্বিবিধঃ প্রবর্ত্ততে সর্গঃ॥৫২॥

ভাবৈঃ আকাশাদিবিষয়ৈঃ বিনা লিঙ্গং মহদাদ্যতীন্দ্রিয়জাতং ন

ভোগসাধনমিতি শেষঃ, লিঙ্গেন মহদাদিনা বিনা ন ভাবনির্বৃত্তিঃ, ন ভাবানাং বিষয়াণাং নির্বৃত্তিঃ ভোগসাধনত্বম্। তথাচ বিষয়ো ন স্বরূপতো ভোগহেতুঃ অপি তু জ্ঞাত এব জ্ঞানঞ্চ ইন্দ্রিযান্তঃকরণৈর্বিনা ন সম্ভবতি ইত্যুভয়স্যাবশ্যকত্বমিতি ভাবঃ। তস্মাৎ ভাবলিঙ্গোভয়ং বিনা ভোগাসম্ভবাৎ, লিঙ্গাখ্যঃ মহদাদ্যতীন্দ্রিয়াখ্যঃ, ভাবাখ্যঃ আকাশাদিবিষয়াখ্যঃ দ্বিবিধঃ সর্গঃ প্রবর্ত্ততে ইতি॥ ৫২॥

ভৌতিকসর্গং বিভজতে,

অষ্টবিকল্পোদৈবস্তৈর্য্যগ্‌যোনশ্চ পঞ্চধা ভবতি।
মানুষ্যশ্চৈকবিধঃ সমাসতো ভৌতিকঃ সর্গঃ॥ ৫৩॥

ব্রাহ্মপ্রাজাপত্যৈন্দ্রপৈত্র্যগান্ধর্ব্বযাক্ষরাক্ষসপৈশাচভেদাৎ অষ্টবিধো দৈবঃ সর্গঃ, পশুপক্ষিসর্পকীটস্থাবরভেদাৎ পঞ্চবিধঃ তৈর্য্যগ্‌যোনঃ, ব্রাহ্মণত্বাদ্যবান্তরভেদাবিবক্ষয়া একবিধঃ মানুষ্যঃ সর্গঃ, ইতি সমাসতঃ সংক্ষেপতঃ ভৌতিকঃ ভূতনির্বৃত্তঃ সর্গঃ ঘটাদীনাং স্থাবরেষু অন্তর্ভাবাৎ ন বিভাগন্যূনতেতি॥ ৫৩॥

ঊর্দ্ধাধোমধ্যভেদেন ভৌতিকসর্গস্য ত্রৈবিধ্যমাহ,—

ঊর্দ্ধং সত্ত্ববিশালস্তমোবিশালশ্চ মূলতঃ সর্গঃ।
মধ্যে রজোবিশালোব্রহ্মাদিস্তম্বপর্য্যন্তঃ॥ ৫৪॥

ঊর্দ্ধং ভূলোকাদূর্দ্ধং দ্যুপ্রভৃতিঃ সত্যান্তোলোকঃ, সত্ত্ববিশালঃ, রজস্তমসোঃ সত্ত্বেঽপি সত্ত্ববহুলঃ, মূলতঃ সর্গঃ অধঃপতনশীলস্তৈর্য্যগ্‌যোনঃ সর্গঃ, তমোবিশালঃ, সত্ত্বরজসোঃ সত্ত্বেঽপি তমোবহুলঃ। মধ্যে মধ্যস্থিতোভূর্লোকঃ, রজোবিশালঃ সত্ত্বতমসোঃ সত্ত্বেঽপি ধর্ম্মাধর্ম্মপ্রবৃত্তিদর্শনাৎ রজোবহুলঃ। সোঽয়ং সর্গঃ ব্রহ্মাদিস্তম্বপর্য্যন্তঃ, ব্রহ্মাদিস্থাবরান্তঃ ইতি॥ ৫৪॥

তস্য সর্গস্য অপবর্গসাধনবৈরাগ্যোপযোগিনীং দুঃখহেতুতামাহ,

তত্র জরামরণকৃতং দুঃখং প্রাপ্নোতি চেতনঃ পুরুষঃ।
লিঙ্গস্যাবিনিবৃত্তেস্তস্মাদ্দুঃখং স্বভাবেন ॥ ৫৫ ॥

তত্র লোকত্রয়ে, পুরুষঃ স্বভাবতশ্চেতনোঽপি জরামরণকৃতং দুঃখং প্রাপ্নোতি, তস্মাৎ সর্গঃ স্বভাবেন দুঃখরূপঃ। কিয়ন্তং কালং দুঃখং প্রাপ্নোতি তদাহ, লিঙ্গস্যাবিনিবৃত্তেঃ, লিঙ্গং মহদাদিকং যাবন্ন নিবর্ত্ততে তাবদ্দুঃখমিত্যর্থঃ তথাচ মহদাদেঃ প্রকৃতৌ লয়ে সতি চিৎপ্রতিবিম্বিতবুদ্ধেরভাবাৎ স্বতো নির্দুঃখে পুরুষে বুদ্ধিগতং দুঃখং ন প্রভবতীতি ভাবঃ ॥ ৫৫ ॥

সর্গস্য প্রকৃতিমাত্রজন্যত্বং ন ত্বীশ্বরজন্যত্বমিত্যাহ।

ইত্যেষ প্রকৃতিকৃতো মহদাদিবিশেষভূতপর্য্যন্তঃ।
প্রতিপুরুষবিমোক্ষার্থং স্বার্থ ইব পরার্থ আরম্ভঃ ॥৫৬॥

আরভ্যতে ইত্যারম্ভঃ সর্গঃ, ইত্যেষ সর্গঃ মহদাদিবিশেষভূতপর্য্যন্তঃ প্রকৃতিকৃতঃ প্রকৃতিমাত্রোপাদানকঃ নাকারণকঃ ন ব্রহ্মোপাদানকঃ, নাপি ব্রহ্মাধিষ্ঠিতপ্রকৃত্যুপাদানকঃ অকারণকত্বে অত্যন্তভাবোঽত্যন্তাভাবো বা স্যাৎ, কূটস্থস্য ব্রহ্মণঃ অপরিণামাৎ ব্রহ্মোপাদানকত্বং ন সম্ভবতি নির্ব্যাপারস্য ব্রহ্মণঃ অধিষ্ঠাতৃত্বাসম্ভবাৎ তদধিষ্ঠিতোপাদানকত্বস্যাপ্যসম্ভবঃ। ননু নিত্যায়াঃ প্রকৃতেঃ সর্ব্বদা সত্ত্বেন সর্গস্য সার্ব্বদিকত্বসম্ভবাৎ পুরুষস্যানির্মোক্ষঃ স্যাদিত্যত আহ, প্রতিপুরুষেত্যাদি, প্রতিপুরুষবিমোক্ষার্থং স্বার্থ ইব পরার্থে আরম্ভঃ, যথা স্বার্থসাধনার্থং প্রবৃত্তির্ভবতি তথা পরার্থসাধনার্থমপীত্যচেতনায়াঃ প্রকৃতেঃ স্বপ্রয়োজনাভাবেঽপি পুরুষবিমোক্ষরূপপরপ্রয়োজনার্থং সর্গে প্রবৃত্তিরিত্যর্থঃ, তথাচ যথা ওদনকামঃ পাকে প্রবৃত্তঃ ওদনসিদ্ধৌ

নিবর্ত্ততে তথা প্রকৃতিঃ যং পুরুষং মোচয়িতুং প্রবৃত্তা ভবতি মোক্ষে সিদ্ধে তং পুরুষং প্রতি নিবর্ত্ততে ইতি নানির্মোক্ষপ্রসঙ্গ ইতি ভাবঃ॥ ৫৬॥

নমু চেতনস্য পরার্থং প্রবৃত্তাবপি অচেতনায়াঃ প্রকৃতেঃ কথং তৎসম্ভবঃ, ইত্যত আহ,

বৎসবিবৃদ্ধিনিমিত্তং ক্ষীরস্য যথা প্রবৃত্তিরজ্ঞস্য।
পুরুষবিমোক্ষনিমিত্তং তথা প্রবৃত্তিঃ প্রধানস্য॥৫৭॥

যথা অজ্ঞস্য অচেতনস্য ক্ষীরস্য বৎসবিবৃদ্ধ্যর্থং প্রবৃত্তিঃ তথা পুরুষবিমোক্ষার্থং প্রধানস্য অচেতনায়াঃ প্রকৃতেঃ প্রবৃত্তিরিত্যর্থঃ। ন চ ক্ষীরমীশ্বরাধিষ্ঠিতমেব প্রবর্ত্ততে ইতি দৃষ্টান্তাসিদ্ধিরিতি বাচ্যম্। ঈশ্বরে প্রমাণাভাবাৎ প্রমাণসত্ত্বেঽপি অবাপ্তকামত্বেশ্বরস্য প্রয়োজনং বিনা প্রবর্ত্তকত্বাযোগাচ্চ। ন চ কারুণ্যমেব তস্য প্রয়োজনমিতি বাচ্যম্। সৃষ্টেঃ পূর্ব্বং জীবানাং দুঃখাসম্ভবাৎ দুঃখপ্রহরণেচ্ছারূপস্য কারুণ্যস্য তত্রাসম্ভবাৎ। করুণয়া প্রেরিত ঈশ্বরঃ যদি জন্তূন্ সৃজেৎ তর্হি সুখিন এব সৃজেৎ ন তু দুঃখিনঃ। নমু কর্ম্মবৈচিত্র্যং তত্র প্রযোজকমিতি চেন্ন কর্ম্মাধিষ্ঠানেন শরীরোৎপাদনপূর্ব্বকং দুঃখমুৎপাদ্য পুনস্তন্নাশার্থং কারুণ্যাবলম্বনস্য প্রক্ষালনাদ্ধীতি ন্যায়েনাযুক্তত্বাৎ ইতি॥ ৪৭॥

প্রধানস্য প্রবৃত্তৌ প্রয়োজনং দর্শয়তি,

ঔৎসুক্যনিবৃত্ত্যর্থং যথা ক্রিয়াসু প্রবর্ত্ততে লোকঃ।
পুরুষস্য বিমোক্ষার্থং প্রবর্ত্ততে তদ্বদব্যক্তম্॥ ৫৮॥

ঔৎসুক্যং ইদং বস্তু ময়া ভোক্তব্যং ইতীচ্ছা তন্নিবৃত্ত্যর্থং যথা লোকঃ ভোজনাদিক্রিয়াসু প্রবর্ত্ততে তথা অয়ং পুরুষঃ ময়া মোচয়ি-

তব্য ইতীচ্ছায়াং সত্যাং পুরুষবিমোক্ষার্থং অব্যক্তং প্রধানং প্রবর্ত্তে। তথাচ ইচ্ছাবিষয়ীভূতবস্তুপ্রাপ্তৌ সত্যাং ইচ্ছায়া নিবৃত্তেঃ তাদৃশবিষয়প্রাপ্ত্যর্থং প্রবৃত্তির্নিষ্প্রত্যূহৈব ইতি ভাবঃ ॥ ৫৮ ॥

প্রকৃতেঃ প্রবৃত্ত্যুপায়ং দর্শয়িত্বা নিবৃত্ত্যুপায়ং দর্শয়তি,

রঙ্গস্য দর্শয়িত্বা নিবর্ত্ততে নর্ত্তকী যথা নৃত্যাৎ।
পুরুষস্য তথাত্মানং প্রকাশ্য বিনিবর্ত্ততে প্রকৃতিঃ ॥৫৯॥

যথা নর্ত্তকী নৃত্যগীতাদিভিঃ আত্মানং রঙ্গস্য আশ্রিতলক্ষণয়া রঙ্গপদপ্রতিপাদ্যস্য সভ্যাদেঃ দর্শয়িত্বা নৃত্যাৎ নিবর্ত্ততে, তথা প্রকৃতিঃ মহদাদিভাবেন আত্মানং পুরুষস্য প্রকাশ্য প্রকৃতিপুরুষয়োর্ভেদজ্ঞানরূপবিবেকাৎ নিবর্ত্ততে, তস্যা নিবৃত্ত্যা পুরুষো মোক্ষমধিগচ্ছতীতি ॥ ৫৯ ॥

ননু প্রত্যুপকারসংভবেনৈব পরার্থা প্রবৃত্তির্লোকে দৃশ্যতে অতঃ পরস্মাৎ প্রত্যুপকারসম্বন্ধাসংভবাৎ প্রকৃতেঃ কথং পরার্থপ্রবৃত্তিরিত্যাশঙ্কায়ামাহ,

নানাবিধৈরুপায়ৈরুপকারিণ্যনুপকারিণঃ পুংসঃ।
গুণবত্যগুণস্য সতস্তস্যার্থমপার্থকং চরতি ॥ ৬০ ॥

গুণবতী অতএব উপকারিণী প্রকৃতিঃ সতঃ সচ্চিৎস্বভাবস্য অতএব অগুণস্য গুণাতীতস্য অতএব অনুপকারিণঃ উপকারাসমর্থস্য তস্য পুংসঃ পুরুষস্য নানাবিধৈঃ মহদহঙ্কারেন্দ্রিয়মনঃপ্রভৃতিভিঃ উপায়ৈঃ অর্থং প্রয়োজনং, অপার্থকং স্বীয়প্রয়োজনশূন্যমেব, চরতি আচরতি, তথাচ গুণবতামযমেব স্বভাবঃ যৎ অনুপকারিণ্যপি উপকারকরণম্, অতঃ প্রত্যুপকারসম্বন্ধাভাবেঽপি পরার্থা প্রবৃত্তিঃ সম্ভবতীতি ভাবঃ ॥ ৬০ ॥

নন্থ সভোভ্যো নৃত্যং দর্শয়িত্বা ধনপ্রাপ্ত্যা নিবৃত্তায়া অপি নর্ত্তক্যাঃ যথা কুতূহলাৎ পুনর্নর্ত্তনপ্রবৃত্তিঃ তথা আত্মানং পুরুষায় দর্শয়িত্বা বিবেকেন নিবৃত্তায়া অপি প্রকৃতেঃ কথং ন পুনঃ প্রবৃত্তিরিত্যাশঙ্কায়ামাহ,

প্রকৃতেঃ সুকুমারতরং ন কিঞ্চিদস্তীতি মে মতির্ভবতি। যা দৃষ্টাস্মীতি পুনর্নদর্শনমুপৈতি পুরুষস্য ॥ ৬১ ॥

প্রকৃত্যপেক্ষয়া সুকুমারতরং লজ্জাতিশয়যুক্তং কিঞ্চিদ্বস্তু নাস্তীতি মে বুদ্ধির্ভবতি যা প্রকৃতিঃ দৃষ্টাস্মীতি, পুরুষেণ জ্ঞানচক্ষুষা অবলোকিতাহং ইতি কৃত্বা পুরুষস্য পুনঃ দৃষ্টিগোচরীভূতা ন ভবতি ইতি সমুদিতার্থঃ। তথাচ কাচিৎ কুলবধূঃ কদাচিৎ পরপুরুষেণাবলোকনাৎ লজ্জিতা সতী তথা যততে যথৈষা পুরুষান্তরেণাবলোকয়িতুং ন শক্যতে তথা প্রকৃতিঃ বিবেকেন পরাত্মনা পুরুষেণ দৃষ্টা সতী পুনঃ পুরুষস্য দর্শনং নোপৈতি, বিবেকখ্যাতিরেব পুনর্দর্শনপ্রতিবন্ধিকেতি ভাবঃ ॥ ৬১ ॥

নন্থ যদি নির্গুণঃ পুরুষস্তর্হি অপরিণামিত্বাৎ কথমস্য বন্ধমোক্ষাদিকং সম্ভবতীত্যাশঙ্কায়ামাহ,

তস্মান্ন বধ্যতেঽদ্ধা ন মুচ্যতে নাপি সংসরতি কশ্চিৎ। সংসরতি বধ্যতে মুচ্যতে চ নানাশ্রয়া প্রকৃতিঃ ॥ ৬২ ॥

তস্মাৎ নির্গুণত্বাৎ, কশ্চিৎ পুরুষঃ, অদ্ধা তত্ত্বং ন বধ্যতে, নাপি সংসরতি নাপি মুচ্যতে। তর্হি কস্য বন্ধাদিকমিত্যত আহ সংসরতীত্যাদি, বুদ্ধ্যাদিনা নানাপুরুষাশ্রয়া প্রকৃতিরেব বধ্যতে সংসরতি মুচ্যতে চ। তথাচ বুদ্ধৌ পুরুষস্য প্রতিবিম্বাৎ বুদ্ধিগতং বন্ধমোক্ষা-

দিকং পুরুষে উপচর্য্যতে, ন তু তত্ত্বতঃ পুরুষস্থ বন্ধমোক্ষাদিকমিতি ভাবঃ ॥ ৬২ ॥

প্রকৃতিগতানাং বন্ধসংসারমোক্ষানাং কিং সাধনমিত্যাশঙ্কায়ামাহ,

রূপৈঃ সপ্তভিরেব তু বধ্নাত্যাত্মানমাত্মনা প্রকৃতিঃ।
সৈব চ পুরুষার্থং প্রতি বিমোচয়ত্যেকরূপেণ ॥ ৬৩ ॥

প্রকৃতিঃ সপ্তভিরেব রূপৈঃ জ্ঞানরহিতৈঃ ধর্ম্মাধর্ম্মবৈরাগ্যাবৈরাগ্যৈশ্বর্য্যানৈশ্বর্য্যাজ্ঞানস্বরূপৈঃ সপ্তভির্ভাবৈঃ, পুরুষার্থং প্রতি ভোগং প্রতি, আত্মনা বুদ্ধিরূপেণ, আত্মানং পুরুষং বধ্নাতি, চ পুনঃ, সৈব প্রকৃতিরেব, পুরুষার্থং প্রতি মোক্ষং প্রতি, একরূপেণ তত্ত্বজ্ঞানেন বিবেকখ্যাত্যেতি যাবৎ, আত্মানং পুরুষং, বিমোচয়তি সংসারান্নিবর্ত্তয়তি। তথাচ ধর্ম্মাধর্ম্মাদীনাং বন্ধনসাধনত্বং, তত্ত্বজ্ঞানমাত্রস্থ মোক্ষসাধনত্বমিতি ভাবঃ ॥ ৬৩ ॥

নন্থ কিং তত্ত্বজ্ঞানসাধনমিত্যাশঙ্কায়ামাহ,

এবং তত্ত্বাভ্যাসান্নাস্মি ন মে নাহমিত্যপরিশেষম্।
অবিপর্য্যয়াদ্বিশুদ্ধং কেবলমুৎপদ্যতে জ্ঞানম্ ॥ ৬৪ ॥

এবং উক্তপ্রকারেণ, তত্ত্বাভ্যাসাৎ তত্ত্বস্থ পুরুষতত্ত্বস্থ কর্ত্তৃত্বভোক্তৃত্বাস্থভাবরূপস্থ, অভ্যাসাৎ পুনঃ পুনশ্চিন্তনরূপান্নিদিধ্যাসনাৎ নাস্মি ন কর্ত্তাস্মি, এতেন পুরুষস্থ বুদ্ধিভিন্নত্বং সূচিতং, ন মে দুঃখমিতি শেষঃ, এতেন দুঃখাগ্যারোপাভাবঃ সূচিতঃ, নাহং নাহং জানামি, এতেন অহঙ্কারাভাবঃ সূচিতঃ ইতি ইত্যাকারকম্, অপরিশেষং, নাস্তি পরিশেষো যস্মাৎ ইত্যপরিশেষং চরমম্, অবিপর্য্যয়াদ্বিশুদ্ধম্, অবিপর্য্যয়াৎ ব্যধিকরণাপ্রকারকত্বাৎ, বিশুদ্ধং প্রমাত্মকম্, এতেন তাদৃশজ্ঞানস্থ মিথ্যাজ্ঞানবাসনোন্মূলনক্ষমত্বং সূচিতম্। কেবলং

সংশয়বিপর্য্যয়াসম্পৃক্তং, জ্ঞানং প্রকৃতিপুরুষয়োর্ভেদবিষয়কং জ্ঞানম্, উৎপদ্যতে, তথাচ ঈদৃশমেব জ্ঞানং মোক্ষহেতুরিতি ভাবঃ॥ ৬৪॥

তত্ত্বজ্ঞানেন কিং সিধ্যতীত্যাহ,

তেন নিবৃত্তপ্রসবামর্থবশাৎ সপ্তরূপবিনিবৃত্তাম্।
প্রকৃতিং পশ্যতি পুরুষঃ প্রেক্ষকবদবস্থিতঃ সুস্থঃ॥ ৬৫॥

তেন তত্ত্বজ্ঞানেন, নিবৃত্তপ্রসবাং নিবৃত্তাঃ প্রসবাঃ ভোগবিবেক-সাক্ষাৎকারাদয়ঃ যস্যাঃ এবংভূতাং, তথাচ ভোগবিবেকসাক্ষাৎকারা-বেব প্রকৃতেঃ প্রসোতব্যৌ তয়োঃ প্রসবে সতি প্রসোতব্যান্তরাভাবাৎ প্রকৃতেঃ নিবৃত্তির্ভবতীতি ভাবঃ। অর্থবশাৎ সপ্তরূপবিনিবৃত্তাম, অর্থস্য তত্ত্বজ্ঞানস্য বশাৎ সামর্থ্যাৎ, পূর্ব্বোক্তধর্ম্মাধর্ম্মাদিসপ্তবিধভাব-রহিতাং, তথাচ ধর্ম্মাধর্ম্মাদয়ো হি ভাবা অতত্ত্বজ্ঞানপূর্ব্বকাঃ ইতি বিরোধিতত্ত্বজ্ঞানেন কারণনিবৃত্ত্যা তে নিবৃত্তিং প্রাপ্নুবন্তি ইতি ভাবঃ। প্রকৃতিং, প্রেক্ষকবদবস্থিতঃ সন্ পশ্যতি তথাচ যথা কশ্চিৎ প্রেক্ষকঃ রঙ্গস্থঃ গীতনৃত্যাদিকারিণীং নর্ত্তকীং নিশ্চেষ্টঃ সন পশ্যতি তথা পুরুষোঽপি তত্ত্বজ্ঞানে জাতে নিশ্চেষ্টঃ সন প্রকৃতিং পশ্যতীতি ভাবঃ॥ ৬৫॥

নন্ন প্রকৃতিপুরুষয়োর্নিত্যত্বেন সর্ব্বদা সংযোগসত্ত্বাৎ কথং তস্যাঃ সর্গনিবৃত্তিরিত্যত আহ,

দৃষ্টা ময়েত্যুপেক্ষক একোদৃষ্টাহমিত্যুপরমত্যন্যা।
সতি সংযোগেঽপি তয়োঃ প্রয়োজনং নাস্তি সর্গস্য ৬৬

তয়োঃ প্রকৃতিপুরুষয়োঃ সংযোগেঽপি নিত্যত্বেন সর্ব্বদা সংযোগস্য সত্ত্বেঽপি, সর্গস্য, প্রয়োজনং প্রযুজ্যতে সর্গার্থং প্রকৃতিরনেনেতি

ব্যুৎপত্ত্যা সহকারিকারণং তচ্চ প্রকৃতিপুরুষয়োরভেদজ্ঞানরূপং তন্নাস্তীত্যর্থঃ। কথং নাস্তীত্যাহ, দৃষ্টা ইতি, ইতি বিবিচ্য উপেক্ষকঃ ভোগনিবৃত্তঃ ভবতীতি শেষঃ। অন্যা তয়োরন্যা প্রকৃতিঃ, অহং পুরুষেণ স্বভিন্নত্বেন দৃষ্টা ইতি বিবিচ্য উপরমতিপ্রসবনিবৃত্তা ভবতি। তথাচ প্রসবং প্রতি প্রকৃতিপুরুষয়োরভেদজ্ঞানস্য সহকারিকারণ-ত্বেন তয়োর্ভেদজ্ঞানে সতি তদভাবাৎ ন প্রসব ইতি ভাবঃ॥ ৬৬॥

নন্থ তত্ত্বজ্ঞানমাত্রস্য যদি মোক্ষহেতুত্বং তদা তত্ত্বজ্ঞানানন্তরমেব মোক্ষসম্ভবেন শরীরপাতসম্ভবাৎ জ্ঞানসামান্যং প্রতি শরীরস্য হেতুত্বাচ্চ কথমশরীরস্য পুরুষস্য প্রকৃতিদর্শনং সম্ভবতি কর্ম্মক্ষয়সহকৃতস্য তত্ত্ব-জ্ঞানস্য যদি মোক্ষহেতুত্বমুচ্যতে তদা কর্ম্মক্ষয়বশেনৈব মোক্ষ-সম্ভবাৎ কৃতং তত্ত্বজ্ঞানপ্রযাসেন ইত্যাশঙ্কায়ামাহ,

সম্যগ্‌জ্ঞানাধিগমাৎ ধর্ম্মাদীনামকারণপ্রাপ্তৌ।
তিষ্ঠতি সংস্কারবশাচ্চক্রভ্রমিবদ্ধৃতশরীরঃ॥ ৬৭॥

সম্যগ্‌জ্ঞানস্য তত্ত্বজ্ঞানস্য অধিগমাৎ উদয়াৎ ধর্ম্মাদীনাং শরী-রারম্ভকধর্ম্মাধর্ম্মাণাং প্রাক্‌ সঞ্চিতানাং ক্রিয়মাণানাঞ্চ দগ্ধবীজ-ভাবানাং,তথাচ ক্লেশসলিলাবসিক্তানাং হি বুদ্ধিভূমৌ কর্ম্মবীজান্যঙ্কুরম্‌ উৎপাদয়ন্তি, তত্ত্বজ্ঞাননিদাঘনিপীতসকলক্লেশসলিলায়ামূষরায়াম্‌ উপ্তেভ্যঃ কর্ম্মবীজেভ্যঃ কথমঙ্কুরাণামুৎপাদসম্ভব ইতি তেষাং দগ্ধ-বীজভাব ইতি ভাবঃ। অকারণপ্রাপ্তৌ, অকারণেতি ভাবপ্রধান-নির্দ্দেশঃ অকারণত্বপ্রাপ্তাবিত্যর্থঃ, তাদৃশকর্ম্মণাং কার্য্যোৎপাদনা-সামর্থ্যে সতীতি যাবৎ চক্রভ্রমিবৎ কুলালব্যাপারবিগমেঽপি বেগাখ্য-সংস্কারবশাৎ যথা চক্রং ভ্রমৎ তিষ্ঠতি কালপরিপাকবশাৎ নিষ্ক্রিয়ঞ্চ ভবতি তথা তত্ত্বজ্ঞানবশাৎ ব্যাপারবিগমেঽপি সংস্কারবশাৎ ভোগ-

মাত্রনাশ্যশরীরারম্ভককর্ম্মবশাৎ, জীবঃ ধৃতশরীরঃ সন্ তিষ্ঠতি কাল পরিপাকবশাৎ প্রারব্ধকর্ম্মসু প্রক্ষীণেষু শরীরবিযুক্তোবিমুক্তশ্চ ভবতি, তথাচ তত্ত্বজ্ঞানেন অপ্রারব্ধকর্ম্মণাং নাশেঽপি ভোগেন প্রারব্ধকর্ম্মক্ষয় পর্য্যন্তং শরীরং তিষ্ঠত্যেব অতঃ প্রকৃতিদর্শনং নানুপপন্নং তত্ত্বজ্ঞানা-ভাবে অপ্রারব্ধকর্ম্মণাং ক্ষয়েঽপি উত্তরোত্তরাপরিমিতকর্ম্মসঞ্চয়সম্ভ-বাচ্চ কদাচিদপি জীবানাং ন মোক্ষঃ সম্ভবতীতি তত্ত্বজ্ঞানস্যাবশ্যকত্ব-মিতি ভাবঃ ॥ ৬৭ ॥

যদি তত্ত্বজ্ঞানে জাতেঽপি শরীরং তিষ্ঠতি তর্হি কদা মোক্ষো ভবতীত্যাশঙ্কায়ামাহ,

প্রাপ্তে শরীরভেদে চরিতার্থত্বাৎ প্রধানবিনিবৃত্তৌ।
ঐকান্তিকমাত্যন্তিকমুভয়ং কৈবল্যমাপ্নোতি ॥ ৬৮ ॥

ভোগেন প্রারব্ধকর্ম্মসু ক্ষীণেষু শরীরভেদে শরীরনাশে প্রাপ্তে সতি, চরিতার্থত্বাৎ মহদাদিনা নিষ্পাদিতভোগাপবর্গস্বরূপ প্রয়োজন-কত্বাৎ, প্রধাননিবৃত্তৌ প্রধানস্য প্রকৃতেঃ পুরুষং প্রতি বিনিবৃত্তৌ সংযোগাভাবে, ঐকান্তিকম্ অবশ্যম্ভাবি, আত্যন্তিকং দুঃখান্তর-প্রাগভাবরহিতং মোক্ষং প্রাপ্নোতীত্যর্থঃ ইতি ॥ ৬৮ ॥

প্রেক্ষাবতাং বিশ্বাসার্থমাহ,

পুরুষার্থং জ্ঞানমিদং গুহ্যং পরমর্ষিণা সমাখ্যাতম্।
স্থিত্যুৎপত্তিপ্রলয়াশ্চিন্ত্যন্তে যত্র ভূতানাম্ ॥ ৬৯ ॥

পুরুষার্থং পুরুষাপবর্গরূপপ্রয়োজনসাধনং গুহ্যং দুরবগাহম্, ইদং জ্ঞানং তত্ত্বজ্ঞানং, পরমর্ষিণা, কপিলেন সমাখ্যাতং কথিতং, যত্রেতি নিমিত্তসপ্তমী, যজ্‌জ্ঞানার্থং, ভূতানাং প্রাণিনাং স্থিত্যুৎপত্তি-প্রলয়াঃ চিন্ত্যন্তে, আগমৈশ্চিন্তনীয়াঃ ভবন্তীত্যর্থঃ ॥ ৬৯ ॥

কারিকাদ্বয়েন এতচ্ছাস্ত্রস্য শিষ্যপারম্পর্য্যমাহ,

এতৎ পবিত্রমগ্র্যং মুনিরাসুরয়েঽনুকম্পয়া প্রদদৌ।
আসুরিরপি প ঃশিখায় তেন চ বহুধা কৃতং তন্ত্রম্॥৭০

* পবিত্রং দুঃখঃহেতুভূতপাপনাশকম্, অগ্র্যং সর্ব্বেভ্যঃ পবিত্রেভ্যঃ শ্রেষ্ঠম্ এতচ্ছাস্ত্রং মুনিঃ কপিলঃ অনুকম্পয়া কৃপয়া আসুরয়ে প্রদদৌ আসুরিরপি পঞ্চশিখায় প্রদদৌ তেন চ পঞ্চশিখেন চ বহুধা বহুবিধং তন্ত্রং কৃতং শিষ্যোপদেশদ্বারা, তন্ত্রং সিদ্ধান্তশাস্ত্রং কৃতং প্রকাশিতমিতি ॥৭০॥

শিষ্যপরম্পরয়াগতমীশ্বরকৃষ্ণেন চৈতদার্য্যাভিঃ।
সংক্ষিপ্তমার্য্যমতিনা সম্যগ্‌বিজ্ঞায় সিদ্ধান্তম্॥ ৭১ ॥

শিষ্যপারম্পর্য্যেণ পরিপ্রাপ্তম্ এতচ্ছাস্ত্রম্ আর্য্যাভিঃ ছন্দোবিশেষনিবদ্ধপদ্যৈঃ, আর্য্যমতিনা শ্রেষ্ঠমতিনা ঈশ্বরকৃষ্ণেন, সম্যক্ যাথার্থ্যেন সিদ্ধান্তং বিজ্ঞায় সংক্ষিপ্তং সংক্ষেপেন প্রকাশিতমিত্যর্থইতি ॥ ৭১ ॥

সকলশাস্ত্রার্থসূচকত্বাৎ এতৎ শাস্ত্রং ন তু প্রকরণমিত্যাহ,

সপ্তত্যাং কিল যেঽর্থাস্তেঽর্থাঃ কৃৎস্নস্য ষষ্টিতন্ত্রস্য।
আখ্যায়িকাবিরহিতাঃ পরবাদবিবর্জ্জিতাশ্চাপি ॥ ৭২ ॥

ইতি সাংখ্যকারিকাগ্রন্থঃ সংপূর্ণঃ॥

কৃৎস্নস্য সমস্তস্য ষষ্টিতন্ত্রস্য, পুরুষপ্রকৃত্যাদিষষ্টিপদার্থব্যুৎপাদকশাস্ত্রস্য যেঽর্থাঃ যে বিষয়াঃ, তেঽর্থাঃ তে বিষয়াঃ সপ্তত্যাং কারিকাসপ্তত্যাং কথিতা ইতি শেষঃ। তেঽর্থা আখ্যায়িকাবিরহিতাঃ কথা-

তদৰ্বটিতদৃষ্টান্তাদিরহিতাঃ, পরবাদবিবর্জিতাশ্চ ষড়্দর্শনোত্থাপনরহিতাশ্চ যথা কপিলোক্তষড়ধ্যায্যাং চতুর্থাধ্যায়ে আখ্যায়িকা পঞ্চমে পরবাদঃ তথাত্র ন বর্ত্তত ইতি। ষষ্টিপদার্থা যথা, পুরুষঃ প্রকৃতিঃ বুদ্ধিরহঙ্কারো গুণাস্ত্রয়ঃ। তন্মাত্রমিন্দ্রিয়ং ভূতং মৌলিকার্থাঃ স্মৃতাদশ॥ বিপর্য্যয়ঃ পঞ্চবিধস্তথোক্তা নবতুষ্টয়ঃ। কারণানামসামর্থ্যমষ্টবিংশতিধা মতম্। ইতি ষষ্টিঃ পদার্থানামষ্টাভিঃ সহ সিদ্ধিভিঃ॥ ইতি,

তথাচ সকলশাস্ত্রার্থসূচকত্বাৎ এতৎ শাস্ত্রং ন তু
প্রকরণমিতি সিদ্ধমিতি ভাবঃ।

ইতি মহামহোপাধ্যায়-শ্রীকামাখ্যানাথতর্কবগীশবিরচিতা
সাংখ্যদীপনী সমাপ্তা।

তদয়ং সংক্ষেপঃ ন্যায়োবৈশিষিকং সাঙ্খ্যং পাতঞ্জলং মীমাংসা বেদান্তশ্চেতি ষড়্দর্শনানি, গোতমকণাদকপিলপতঞ্জলিজৈমিনিব্যাসাঃ যথাক্রমং এতেষাং দর্শনানাং প্রণেতারঃ সর্ব্বেষাং দর্শনানাং মুক্তিরেব উদ্দেশ্যা, সা চ, আত্যন্তিকদুঃখনিবৃত্তিরূপা, যাদৃশদুঃখনিবৃত্তিকালে দুঃখান্তরপ্রাগ্‌ভাবো ন বিদ্যতে তাদৃশদুঃখনিবৃত্তিরূপেতি যাবৎ। মুক্তৌ তত্ত্বজ্ঞানং কারণং তত্ত্বজ্ঞানঞ্চ ন্যায়বৈশেষিকমতে জীবাত্মনঃ শরীরভিন্নত্বেন সাক্ষাৎকারঃ সাঙ্খ্যপাতঞ্জলয়োর্মতে প্রকৃতিপুরুষয়োর্ভেদেন সাক্ষাৎকারঃ বেদান্তমতে তৎ ত্বমসীতি মহাবাক্যপ্রতিপাদ্যার্থভূতস্য জীবব্রহ্মণোরৈক্যস্যাবধারণম্। ন্যায়বৈশেষিকমতে উৎপত্তিবাদঃ তন্মতে পরমাণুরূপমুপাদানং সদেব তস্মাৎ সতঃ অসৎ ঘটাদিকার্য্যম্ উৎপদ্যতে নাশকসহকারাৎ নশ্যতি চ। বেদান্তিনো বিবর্ত্তবাদিনঃ তেষাং মতে ব্রহ্মৈব সৎ সমস্তং জগৎ রজ্জুসর্পবৎ মিথ্যৈব, যথা রঙ্গাৎ মিথ্যারজতমুৎপদ্যতে তথা ব্রহ্মণঃ অলীকং জগদুৎপদ্যতে, সাংখ্যমতে পরিণামবাদঃ তন্মতে সতঃ সৎ জায়তে। কার্য্যাণামাবির্ভাব এব উৎপাদঃ তিরোভাব এব বিনাশঃ। তন্মতে চতুর্ব্বিংশতিতত্ত্বানি, যথা প্রকৃতির্মহান্, অহঙ্কারঃ, শব্দতন্মাত্রং, স্পর্শতন্মাত্রং, রূপতন্মাত্রং, রসতন্মাত্রং, গন্ধতন্মাত্রং শ্রোত্রং, ত্বক্, চক্ষুঃ, রসনা, ঘ্রাণম্ এতানি পঞ্চ জ্ঞানেন্দ্রিয়াণি, বাক্ পাণিঃ, পাদঃ, পায়ুঃ উপস্থঃ, এতানি পঞ্চ কর্ম্মেন্দ্রিয়াণি, জ্ঞানকর্ম্মোভয়েন্দ্রিয়স্বরূপং মনঃ ইত্যেকাদশেন্দ্রিয়াণি আকাশং বায়ুরগ্নিঃ জলং, পৃথিবী, এতানি পঞ্চমহাভূতানি পুরুষমাদায় পঞ্চবিংশতিতত্ত্বানি। এতেষাং তত্ত্বানাং মধ্যে কিঞ্চিৎ তত্ত্বং প্রকৃতিরেব, কিঞ্চিৎ বিকৃতিরেব, কিঞ্চিৎ প্রকৃতিবিকৃত্যুভয়াত্মকং কিঞ্চিৎ তদুভয়ানাত্মকম্। মূলপ্রকৃতিঃ মহত্তত্ত্বস্য কারণত্বাৎ প্রকৃতিরূপৈব, তস্যাঃ প্রকৃত্যন্তরাভাবাৎ ন বিকৃতিরূপত্বম্; মহদাদিপঞ্চ-

তন্মাত্রাণি সাক্ষাৎ পরম্পরয়া ইন্দ্রিয়পঞ্চমহাভূতপ্রকৃতিরূপত্বাৎ সাক্ষাৎ পরম্পারয়া মূলপ্রকৃতিবিকৃতিরূপত্বাচ্চ প্রকৃতিবিকৃত্যুভয়াত্মকানি, ইন্দ্রিয়াণি পঞ্চমহাভূতানি চ পঞ্চতন্মাত্রবিকৃতিরূপত্বাৎ তত্ত্বান্তর-প্রকৃতিরূপত্বাভাবাচ্চ বিকৃতিরূপাণ্যেব। পুরুষস্তু নিত্যঃ অপরি-ণামী প্রকৃতিবিকৃতিত্যুভয়ানাত্মকশ্চ। মূলপ্রকৃতিঃ ত্রিগুণাত্মিকা সত্ত্বরজস্তমোগুণানাং সাম্যাবস্থারূপেতি যাবৎ, সা চ নিত্যা পরিণা-মিনী জড়াত্মিকা কার্য্যকারণয়োরভেদাৎ সুখদুঃখমোহাত্মিকা চ, দধ্যাদিকং যথা দুগ্ধস্য বিকারবিশেষভূতং তথা সমস্তকার্য্যং তস্যা এব সাক্ষাৎ পরম্পরয়া বিকারবিশেষভূতম্। বুদ্ধিঃ অহঙ্কারঃ, মনঃ, এতানি ত্রীণি শরীরাভ্যন্তরস্থিতত্বাৎ অন্তঃকরণপদবাচ্যানি চক্ষুরাদীনি দশে-ন্দ্রিয়াণি শরীরবহিঃস্থিতত্বাৎ বাহ্যেন্দ্রিয়পদবাচ্যানি। শান্তঘোরমূঢ়-ভেদেন পঞ্চমহাভূতানি ত্রিবিধানি যানি সত্ত্বপ্রধানানি তানি শান্তানি, যানি রজঃপ্রধানানি তানি ঘোরাণি যানি তমঃপ্রধানানি তানি মূঢ়ানি। মহত্তত্ত্বমেব বুদ্ধিঃ প্রকৃতেঃ প্রথমঃ পরিণামঃ, কর্তৃত্বং সুখদুঃখাদিকঞ্চ বুদ্ধেরেব ধর্ম্মঃ পুরুষস্তু শরীরভেদেন বিভিন্নঃ তস্য কর্তৃত্বং সুখদুঃখাদিকঞ্চ কিমপি নাস্তি, জবাকুসুমসন্নিহিতস্য স্ফাটিকস্য রক্তত্বমিব বুদ্ধৌ পুরুষস্য প্রতিবিম্ববশাৎ বুদ্ধৌ চৈতন্যং পুরুষে চ কর্তৃত্বাদিকমারোপিতং ভবতি। স্বামিকর্তৃকদৃষ্টদোষা স্ত্রী যথা স্বামি-সমীপং গন্তুং ন প্রবর্ত্ততে তথা তত্ত্বজ্ঞপুরুষকর্তৃকদৃষ্টদোষাপ্রকৃতিঃ তস্মাৎ নিবৃত্তা সতী তস্য পুনঃ সংসারসৃষ্টৌ ন প্রবর্ত্ততে ইতি তত্ত্বজ্ঞানানন্তরং পুরুষো মুক্তো ভবতি। ভগবতা কপিলেন যথা প্রকৃতিমহত্তত্ত্বাদীনি পঞ্চবিংশতিতত্ত্বানি স্বীকৃতানি, ভগবতা পতঞ্জলিনাপি তথৈব স্বীকৃতানি সৃষ্টিপ্রক্রিয়ায়াং তয়োঃ কশ্চিন্মত-ভেদো নাস্তি, পরন্তু কপিলমতে জীবাতিরিক্তঃ সর্ব্বনিয়ন্তা সর্ব্বব্যাপী সর্ব্বশক্তিমানীশ্বরো নাস্তি, পতঞ্জলিমতে সোঽস্তীতি ইয়ানেব বিশেষঃ,

অতএব কপিলদর্শনং নিরীশ্বরসাঙ্খ্যদর্শনপদবাচ্যং, পতঞ্জলিদর্শনং সেশ্বরসাঙ্খ্যদর্শনপদবাচ্যমিতি ইত্যলং পল্লবিতেন ॥ ০ ॥

প্রত্যক্ষমেকং চার্ব্বাকাঃ কণাদসুগতৌ পুনঃ। অনুমানঞ্চ তচ্চাপি সাংখ্যাঃ শব্দঞ্চ তে অপি। ন্যায়ৈকদেশিনোঽপ্যেবম্ উপমানঞ্চ কেচন। অর্থাপত্ত্যা সহৈতানি চত্বার্য্যাহুঃ প্রভাকরাঃ। অভাবষষ্ঠান্যেতানি ভাট্টা বেদান্তিনস্তথা। সম্ভবৈতিহ্যযুক্তানি তানি পৌরাণিকা জগুঃ ॥ ০ ॥ ওঁ তৎ সৎ।